कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

सं

॥श्रीगणेशाय नमः॥ पूर्वाध्याये श्रद्धात्रैविध्येनाहारयज्ञतपोदानत्रैविध्येन च कर्मिणां॥ त्रैविध्यमुक्तं सात्वि
कानामादानाय राजसतामसानांच हानाय। इदानींतु संन्यासत्रैविध्यकथनेन संन्यासिनामपि त्रैवि
ध्यं वक्तव्यं। तत्र तत्वबोधानंतरं यः फलभूतः सर्वकर्मसंन्यासः स च चतुर्दशेध्याये गुणातीतत्वेन व्याख्या
तत्वान्न सात्विकराजसतामसभेदमर्हति। योपि तत्वबोधात्प्राक् तदर्थं सर्वकर्मसंन्यासस्तत्वबुभुत्सया
वेदांतवाक्यविचाराय भवति सोपि त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेत्यादिना निर्गुणत्वेन व्याख्या
तः। यस्त्वनुत्पन्नतत्वबोधानामनुत्पन्नतत्वबुभुत्सानांच कर्मसंन्यासः स संन्यासी च योगी चेत्यादि
ना गौणो व्याख्यातस्तस्य त्रैविध्यं भवातद्विशेषं बुभुत्सुः॥ ॥अर्जुन उवाच॥ ॥संन्यासस्य महाबाहो
तत्वमिच्छामि वेदितुं॥ त्यागस्य च हृषीकेश पृथक्केशिनिषूदन॥१॥ अविदुषामनुपजातविविदिषाणां
च कर्माधिकृतानामेव किंचित्कर्मपरिग्रहेण किंचित्कर्मपरित्यागो यः स त्यागोंशगुणायोगात्संन्यास
शब्देनोच्यते। एतादृशस्यांतःकरणशुद्ध्यर्थमविद्वत्कर्माधिकारिकर्तृकस्य संन्यासस्य केनचिद्रू
पेण कर्मत्यागस्य तत्वं स्वरूपं पृथक् सात्विकराजसतामसभेदेन वेदितुमिच्छामि त्यागस्य च तत्वं वे
दितुमिच्छामि। किं संन्यासत्यागशब्दौ घटपटशब्दाविव भिन्नजातीयार्थौ॥ किं वा ब्राह्मणपरिव्रा
जकशब्दाविव एकजातीयार्थौ॥ यद्याद्यस्तर्हि त्यागस्य तत्वं संन्यासात्पृथग्वेदितुमिच्छामि। यदि
द्वितीयस्तर्ह्यवांतरोपाधिभेदमात्रं वक्तव्यं। एकव्याख्याने नैवोभयं व्याख्यातं भविष्यति। महाबा

Acc. NO. ~~1156~~.M-1760

Title- भगवद्गीता (18 वा अध्याय) Comm. with मधुसूदन सरस्वती.
Author - व्यास.
Date - A.D. 1736.
Subject - वेदान्त.
Folio - 44
Xerox - 86

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1760
Dist Nagpur

1

होकेशिनिषूदनेति संबोधनाभ्यां॥ बाह्योपद्रवनिवारणस्वरूपयोग्यताफलोपधाने प्रदर्शिते हृषी
केशेत्यंतरुपद्रवनिवारणसामर्थ्यमिति भेदः अत्यनुरागात्संबोधनत्रयं। अत्रार्जुनस्य द्वौ प्रश्नौ क
र्माधिकारिकर्तृकत्वेन पूर्वोक्तयज्ञादिसाधर्म्येण संन्यासशब्दप्रतिपाद्यत्वेन च गुणातीतसंन्यास
द्वयसाधर्म्येण त्रैगुण्यसंभवासंभवाभ्यां संशयः प्रथमप्रश्नस्य बीजं। द्वितीयस्य तु संन्यासत्या
गशब्दयोः॥ पर्यायत्वात्कर्मतत्फलत्यागरूपेणा च वैलक्षण्योक्तेः संशयः॥१॥ तत्रांतिमस्य सूचिक
टाहन्यायेन निराकरणायोत्तरं॥ ॥श्रीभगवानुवाच॥ ॥काम्यानां कर्मणां न्यासं संन्यासं क
वयो विदुः॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥२॥ ॥काम्यानां फलकामनया चोदिना
मंतःकरणाशुद्धावनुपयुक्तानां कर्मणामिष्टिपशुसोमादीनां न्यासं त्यागं संन्यासं विदुः जानंति क
वयः सूक्ष्मदर्शिनः केचित्। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशके
नेति वाक्येन वेदानुवचनशब्दोपलक्षितस्य ब्रह्मचारिधर्मस्य यज्ञदानशब्दाभ्यामुपलक्षितस्य
गृहस्थधर्मस्य तपोनाशकशब्दाभ्यामुपलक्षितस्य वानप्रस्थधर्मस्य नित्यस्य नित्येन हितेन
पापक्षयद्वारेणात्मज्ञानार्थत्वं बोध्यते। न च विनियोगवैयर्थ्यं। ज्ञानमुत्पद्यते पुंसां क्षयात्पा
पस्य कर्मण इत्यनेनैव लब्धत्वादिति वाच्यं। विनियोगाभावे हिंसस्यापि नित्यकर्मानुष्ठाने

2

ज्ञानं स्याद्ध्यानं वा स्यात्। सति तु विनियोगे ज्ञानमवश्यकं न वेदवेति नियमार्थत्वात्। तस्मान्नित्यकर्मणामेव वेदने विविदिशायां वा विनियोगात्। सत्वशुद्धिविविदिशोत्पत्तिपूर्वकवेदनार्थिना नित्यान्येव कर्माणि भगवदर्पणबुध्यानुष्ठेयानि। काम्यानि तु प्राहुस्त्यागं विचक्षणाः। सर्वेषां काम्यानां नित्यानां च प्रतिपदोक्तफलत्यागं तु सर्वाणि सफलानि परित्याज्यानीत्येकं मतं। अपरं मतं। सर्वकर्मफलत्यागं सत्वशुद्ध्यर्पितया विविदिषासंयोगे चानुष्ठानं विचक्षणा विचारकुशलास्त्यागं प्राहुः॥ खादिरा यूपो भवति। खादिरं वीर्यकामस्य। यूपं करोतीत्यत्र स्पध्ये कस्य खादिरत्वस्य क्रतुप्रकरणपाठात्फलसंयोगाच्च। क्रत्वर्थत्वं पुरुषार्थत्वं च प्रमाणाभेदात्। तथाग्निहोत्रेष्टिपशुसोमानां सर्वेषामपि शतपथपठितानां स्वोत्पत्तिविधिसिद्धानां तत्तत्फलसंयोगः प्रत्येकवाक्येन विविदिषासंयोगश्च यज्ञादिवाक्येन क्रियत इत्युपपन्नं। एकस्य तूभयत्वे संयोगपृथक्त्वमिति न्यायात्। उक्तं संक्षेपशारीरके। यज्ञेनेत्यादिवाक्यं शतपथविहितं कर्म वेदग्रहीत्वा सोत्पत्त्याम्नायसिद्धं पुरुषविविदिषामात्रसाध्ये युनक्तीति। तस्मात्काम्यान्यपि फलाभिसंधिमत्त्वेनान्तःकरणशुद्ध्ये कर्तव्यानि। नह्यग्निहोत्रादिकर्मणां स्वतः काम्यत्वनित्यत्वरूपो विशेषोऽस्ति। पुरुषाभिप्रायभेदस्तु न तत्कृतविशेषः फलाभिसंधियोगेकृतस्य। नित्यकर्मणा च प्रातिस्विकफलसद्भावमनिष्टमिष्टं मिश्रं त्रिविधं कर्मणः फलं नित्य

त्र वक्ष्यति। नित्यानामेव विविदिषासंयोगेन काम्यानां कर्मणां फलेन सह स्वरूपतोपि परित्यागः पूर्वार्द्धस्या
र्थः॥ काम्यानां नित्यानां च संयोगपृथक्त्वेन विविदिषासंयोगाच्च दर्थं स्वरूपतोनुष्ठानेपि प्रातिस्विकफ
लाभिसंधिमात्रपरित्याग उत्तरार्द्धस्यार्थः। तदेतदा कुर्वीत्तेति किछतः। वेदानुवचनादीनामैकात्म्य
ज्ञानजन्मने। तमेतमिति वाक्येन नित्यानां वक्ष्यते विधिः॥ यद्वा विविदिषार्थत्वं सर्वेषामपि कर्मणां।
तमेतमिति वाक्येन संयोगस्य पृथक्त्वत इति तदेवं सफलकाम्यकर्मत्यागः संन्यासशब्दार्थः। सर्वे
षामपि कर्मणां फलाभिसंधित्यागस्त्यागशब्दार्थः इति न घटपटशब्दयोरिव संन्यासत्यागशब्दयो
र्भिन्नजातीयार्थत्वं। किं वंतःकरणशुध्यर्थकर्मानुष्ठाने फलाभिसंधित्याग इत्येक एवार्थ उभयो
रिति निर्णीत एकः प्रश्नोर्जुनस्य॥२॥ अधुना द्वितीयप्रश्नप्रतिवचनाय संन्यासत्यागशब्दार्थस्य
त्रैविध्यं निरूपयितुं तत्र विप्रतिपत्तिमाह॥ ॥त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः॥ यज्ञ
दानतपःकर्म न त्याज्यमिति चापरे॥३॥ ॥सर्वं कर्म बंधहेतुतया दोषवद्दुष्टं। अतः कर्माधिकृतैर
पि कर्म त्याज्यमेवेत्येके मनीषिणः प्राहुः॥ यद्वा दोषवद्दोष इव यथा दोषो रागादिस्त्यज्यते तद्वत्कर्म
त्याज्यमनुत्पन्नबोधैरनुत्पन्नविविदिषैः कर्माधिकारिभिरित्येकः पक्षः अत्र द्वितीयः पक्षः

कर्माधिकारिभिरंतःकरणशुद्धिद्वारा विविदिषोत्पत्त्यर्थं यज्ञदानतपःकर्म न त्याज्यमिति चापरे मनीषिणः प्राहुः ॥३॥ एवं विप्रतिपत्तौ ॥ ॥ निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ॥ त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्त्तितः ॥४॥ ॥ तत्र त्वया पृष्टे कर्माधिकारिकर्तृके संन्यासत्यागशब्दाभ्यां प्रतिपादिते त्यागे फलाभिसंधिपूर्वककर्मत्यागे मे मम वचनान्निश्चयं पूर्वाचार्यैः कृतं शृणु। हे भरतसत्तम। किं तत्र दुर्ज्ञेयमस्तीत्यत आह ॥ हे पुरुषव्याघ्र पुरुषश्रेष्ठ हि यस्मात्त्यागः कर्माधिकारिकर्तृकः फलाभिसंधिपूर्वककर्मत्यागस्त्रिविधस्त्रिप्रकारस्तामसादिभेदेन संप्रकीर्त्तितः। अथवा विशिष्टाभावरूपस्य त्यागो विशेषणाभावाद्विशेष्याभावादुभयाभावाच्च त्रिविधः संप्रकीर्तितः। तथाहि फलाभिसंधिपूर्वककर्मत्यागः सत्यपि कर्मणि फलाभिसंधित्यागादेकः। सत्यपि फलाभिसंधौ कर्मत्यागाद्द्वितीयः। फलाभिसंधेः कर्मणश्च त्यागात्तृतीयः। तत्र प्रथमः सात्विक आदेयः। द्वितीयस्तु हेयो द्विधः। दुःखबुद्ध्या कृतो राजसः। विपर्यासेन कृतस्तामसः। एतावान् कर्माधिकारिकर्तृकस्त्यागोऽर्जुनस्य प्रश्नविषयः। तृतीयस्तु कर्मानधिकारिकर्तृको नैर्गुण्यरूपो नार्जुनप्रश्नविषयः। सोऽपि साधनफलभेदेन द्विविधः। तत्र सात्विकेन फलाभिसंधित्यागपूर्वककर्मानुष्ठानरूपेण त्यागेन शुद्धांतःकरणस्योत्पन्नविविदिषात्मज्ञानसाधनश्रवणाख्यवेदांतविचाराय फलाभिसं

धिरहितस्यांतःकरणशुद्धौ सत्यां तत्साधनस्य कर्मणो वैगुण्ये जात इवावहननस्य परित्यागः स एकः
साधनभूतो विविषासंन्यास उच्यते। तमग्रे नैष्कर्म्यसिद्धिं परमामिति वक्ष्यति। द्वितीयस्तु जन्मांतर
कृतसाधनाभ्यासपरिपाकादस्मिन्जन्मन्यादौ विवोत्पन्नात्मबोधस्य कृतकृत्यस्य स्वत एव फला
भिसंधेः। कर्मणश्च परित्यागः फलभूतः स विद्वत्संन्यास इत्युच्यते। स तु यस्त्वात्मरतिरेव स्यादित्या
दिश्लोकाभ्यां प्राग्व्याख्यातः। स्थितप्रज्ञलक्षणादिभिश्च बहुधा प्रपंचितः। यस्मादेवं त्यागस्य त
त्त्वं दुर्ज्ञेयं त्वया चोक्तं। तत्त्वं वेदितुमिच्छामीति। अतो मम सर्वज्ञस्य वचनाद्विद्धीत्यभिप्रायः। संबोध
नद्वयेन कुलनिमित्तोत्कर्षः पौरुषनिमित्तोत्कर्षश्च योग्यतातिशयसूचनायोक्तः॥४॥ कौसौ
निश्चयो विप्रतिपत्तिकोटिभूतयोः पक्षयोर्द्वितीयः पक्ष इत्याह द्वाभ्यां॥ ॥यज्ञो दानं तपः कर्म=
न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणां॥५॥ ॥चो हेतौ यस्माद्यज्ञदान
तपांसि मनीषिणामकृतफलाभिसंधीनां पावनानि॥ ज्ञानप्रतिबंधकपापमलप्रक्षालनेन ज्ञानो
त्पत्तियोग्यतारूपगुणप्रगुणाधानेन च शोधकानि॥ अकृतफलाभिसंधीनामेव यज्ञदानतपां
स्यव शोधकानि नवंसेव उपाधिशुद्ध्यैवोपहितशुद्धिरत्राभिप्रेता। तस्मादंतःकरणशुद्ध्यर्थि
भिः कर्माधिकृतैर्यज्ञो दानं तप इति यत्फलाभिसंधिरहितं कर्म तन्न त्याज्यं किंतु कार्यमेव तत्।

असाज्यत्वेन कार्यत्वं लब्धेप्यसादरार्थं पुनः कार्यमेवेत्युक्तं यस्मात्कार्यं कर्त्तव्यतया विहितं तस्मान्नसाज्यमिति वा ॥५॥ यदि यज्ञदानतपसामंतःकरणशोधने सामर्थ्यमस्ति तर्हि फलाभिसंधिनाकृतान्यपि तानि तच्छोधकानि न विष्यंतिद्त फलाभिसंधिसागेनेसत आह ॥ ॥एतान्यपि तु कर्माणि संगं सक्त्वा फलानि च । कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ॥६॥ ॥तुशब्दः शंकानिराकरणार्थः । यद्यपि काम्यान्यपि शुद्धिमादधति धर्मस्वाभाव्यात् । तथापि सा तत्फलभोगायोगिन्येव न ज्ञानोपयोगिनी । तदुक्तं वार्त्तिककृद्भिः । काम्येपि शुद्धिरस्त्येव भोगसिद्ध्यर्थमेव सा । विड्वराहादिदेहेन नह्यैंद्रं भुज्यते फलमिति । ज्ञानोपयोगिनीं तु शुद्धिमादधति यानि यज्ञादीनि कर्माणि एतानि फलाभिसंधिपूर्वकत्वेन बंधनहेतुभूतान्यपि मुमुक्षुभिः संगमहमेव करोमीति कर्तृत्वाभिनिवेशं फलानि चाभिसंधीयमानानि सक्त्वांतःकरणशुद्धये कर्त्तव्यानीति मे मम तन्निश्चितमतएव हे पार्थ कर्माधिकृतैः कर्माणि साज्यानि न साज्यानि चेति द्वयोर्मतयोर्न साज्यानीति मम निश्चितं मतमुत्तमं श्रेष्ठं ॥ यदुक्तं निश्चयं शृणु मे तत्रेति सोयं निश्चय उपसंहृतः । भगवत्पूज्यपादानामभिप्रायोयमीरितः । अनिच्छातनया भाष्य दुरापो मंदबुद्धिभिः ॥६॥ तदेवं यज्ञदानतपःकर्म न साज्यमिति च्चापर इति स्वपक्षः स्थापितः ॥ इदानीं साज्यं दोषवदित्येके कर्म प्राहुर्मनीषिण इति परपक्षस्य पूर्वोक्तिसागत्रैविध्यव्याख्यानेन निराकरणमारभ्यते ॥

॥श्लोक॥ ॥नियतस्यतुसंन्यासःकर्मणोनोपपद्यते॥मोहात्तस्यपरित्यागस्तामसःपरिकीर्तितः॥७॥काम्य
स्यकर्मणोंतःकरणशुद्धिहेतुत्वाभावेनबंधहेतुत्वेनचदोषवत्वाद्बंधनिवृत्तिहेतुबोधार्थिनाक्रियमाणस्या
गउपपद्यतएवनियतस्यतुनित्यस्यकर्मणःशुद्धिहेतुत्वेनादोषस्यसंन्यासस्त्यागोमुमुक्षुणांतःकरण
शुद्ध्यर्थिनानोपपद्यतेशास्त्रयुक्तिभ्यां।तस्यांतःकरणशुद्ध्यर्थमवश्यानुष्ठेयत्वात्।तथाचोक्तंप्राक्॥
आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यतइति।ननुदोषवत्वेकाम्यस्येवनित्यस्यापिदर्शपूर्णमासज्योष्टो ति
मादौव्रीहिपश्वादिहिंसामिश्रितत्वेनसांख्यैरभिहितं।नचव्रीहीनवहंति।अग्नीषोमीयंपशुमालभेत
इत्यादिविशेषविधिगोचरत्वात्।क्रत्वंगहिंसायानहिंस्यात्सर्वभूतानीतिसामान्यनिषेधस्यतदितरप
रत्वमितिसांप्रतं।भिन्नविषयत्वेनविधिनिषेधयोरबाधेनैवसमावेशसंभवात्।निषेधेनहिपुरुषस्या
नर्थहेतुःहिंसेत्यभिहितंनक्रत्वर्थासेतिविधिनाचक्रत्वर्थत्वासेत्यभिहितंनत्वर्थहेतुर्नेति।तथाचक्रतूप
कारकत्वपुरुषानर्थहेतुत्वयोरेकत्रसंभवात्क्रत्वर्थापिहिंसानिषिद्धैवेतिहिंसायुक्तंदर्शपूर्णमा
सज्योतिष्टोमादिसर्वंदुष्टमेव।विहितस्यापिनिषिद्धत्वंनिषिद्धस्यापिचविहितत्वंसेनादिवदुपन्न प
मेव।यथाहिश्येनेनाभिचरन्यजेतेत्यभिचारविधिनाविहितोपिश्येनादिर्नहिंस्यात्सर्वभूतानी
तिनिषेधविषयत्वादनर्थहेतुरेवतद्दोषसहिष्णोरेवचरागद्वेषादिवशीकृतस्यतत्राधिकारएवं=

ज्योतिष्टोमादावपि। तथा चोक्तं महाभारते॥ जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते। अहिंसया हि भूतानां जपःयज्ञः प्रवर्त्तत इति। मनुनापि। जप्येनैव तु संसिध्येत् ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यत इति। वदता मैत्रीव हिंसाप्रशंसता हिंसाया दुष्टत्वमेव प्रतिपादितं। अंतःकरणशुद्धिश्चेदीदृशेन गायत्रीजपादिना सुतरामुपपत्स्यत इति हिंसादोषदुष्टं ज्योतिष्टोमादि निसंकर्मदोषासहिष्णुना श्येनादिकमिव कर्माधिकारिणापि त्याज्यमिति प्राप्ते ब्रूमः॥ न क्रत्वर्थी हिंसानर्थहेतुः॥ विधिस्पृष्टे निषेधानवकाशात्। तथा हि। विधिना बलवदिच्छाविषयसाधनताबोधरूपा प्रवर्त्तनां कुर्वतानर्थसाधने तदनुपपत्तेः। स्वविषयस्य प्रवर्त्तनागोचरस्यानर्थसाधनत्वाभावेप्यर्थादौदाक्षिप्येत। तेन विधिविषयस्य नानर्थहेतुत्वं युज्यते। न हि क्रत्वर्थत्वं साक्षाद्विध्यर्थः येन विरोधा न स्यात्। किंतु प्रवर्त्तनैव प्रवर्त्तनाकर्मभूता तु पुरुषप्रवृत्तिः पुरुषार्थमेव विषयी कुर्वती क्वचित् क्रतुमपि पुरुषार्थसाधनत्वेन पुरुषार्थभावमापन्नं विषयीकरोतीत्यन्यत्। पुरुषप्रवृत्तिश्च बलवदिच्छोपधानदशायां जायमाना न भाव्यस्यार्थहेतुतामाक्षिपति न वानर्थहेतुत्वं प्रतिक्षिपति। किं यथाप्राप्तमेवावलंबते। बलवदिच्छाविषयस्य तत एव प्रवृत्तेः स्वर्गादौ विध्यनपेक्षणात्। अत एव विहितस्य न फलस्यापि शत्रुवधरूपस्याभिचारस्यानर्थहेतुत्वमुपपद्यत एव। फलस्य विधिजन्यप्रवृत्तिविषयत्वाभावा

दि

८

9

तू। विधिजन्यप्रवृत्तिविषयं नु धात्वर्थरूपकरणप्रवर्त्तनावलंबते सा चानर्थहेतुं न विषयीकरोति विशेषविधि
बाधितसामान्यनिषेधवाक्यं रागद्वेषादिमूलाक्रत्वर्थलोकिकहिंसाविषयं। तेन श्येनाग्नीषोमीययोर्वैष
म्यादुपपन्नमदुष्टत्वं ज्योतिष्टोमादेः॥ विधिस्पृष्टस्यापि निषेधविषयत्वे षोडशिग्रहणस्याप्यनर्थहेतुत्वा
पत्तिर्नातिरात्रे षोडशिनं गृह्णातीति निषेधात्। तस्मान्न किंचिदेतदिति भाट्टदर्शनं। प्राभाकरं तु दर्शनं।
फलसाधने नैरागत एव प्रवृत्तिसिद्धेर्न नियोगस्य प्रवर्त्तकत्वं। तेन श्येनस्य रागजन्यप्रवृत्तिविषयत्वेन
विधेरौदासीन्यान्न तस्यानर्थहेतुत्वं विधिना प्रतिक्षिप्यते। अग्नीषोमीयहिंसायां तु क्रत्वंगभूता
यां फलसाधनत्वाभावेन रागाभावाद्विधिरेव प्रवर्त्तकः। स च स्वविषयस्यानर्थहेतुतां प्रतिक्षिपे
तीति प्रधानभूता हिंसानर्थं जनयति न क्रत्वर्थेति न हिंसामिश्रत्वेन ज्योतिष्टोमादेदुष्टत्वमिति स
मयेवाएतावन्मात्रे तु विशेषः। चोदनालक्षणोर्थो धर्म इत्यत्रार्थपदव्यावर्त्यत्वेनाधर्मत्वं श्येनादेः
प्राभाकरमते भाट्टमते तु श्येनफलस्यैवाभिचारस्यानर्थहेतुत्वादधर्मत्वं। श्येनस्य तु विहितस्य
समीहितसाधनस्य धर्मत्वमेव। अर्थपदव्यावर्त्यत्वं तु कलंजभक्षणादेर्निषिद्धस्यैवेति फलतो
नर्थहेतुत्वेन तु शिष्टानां श्येनादौ न धर्मत्वेन व्यवहार। तदुक्तं। फलतोपि च यत्कर्म नानर्थेनानुब
ध्यते। केवलप्रीतिहेतुत्वात्तद्धर्म्य इति कथ्यते इति। तार्किकानां तु दर्शनं। कृतिसाध्यत्वमर्थहेतुत्व

मनर्थहेतुत्वंचेतित्रयंविध्यर्थः । तत्रक्रत्वर्थेहिंसायाःसाक्षान्निषेधाभावात्प्रायश्चित्तानुपदेशाच्च । इतिसाध्यत्वार्थहेतुत्वमपिविधिनाबाध्यतइतिनतस्याअनर्थहेतुत्वं । श्येनादेस्त्वभिचारस्यसाक्षादेवनिषेधात्प्रायश्चित्तोपदेशाच्चानर्थहेतुत्वावगमात्तावन्मात्रंतच्चविधिनानबाध्यतइत्युपपन्नंश्येनाग्नीषोमयोर्वैलक्षण्यं । औपनिषदैस्त्विदमेवदर्शनंव्यवहारेपाप्रेणावलंबितं । तथाचभगवद्बादरायणप्रणीतंसूत्रं । अशुद्धमितिचेन्नशब्दादिति । ज्योतिष्टोमादिकर्माग्नीषोमीयहिंसादिमिश्रितत्वेनदुष्टत्वमितिचेन्नअग्नीषोमीयंपशुमालभेतेत्यादिविधिशब्दादित्यक्षरार्थः । जपप्रशंसापरंतुवाक्यंनक्रत्वर्थहेतुत्वज्ञानंधर्मविबोधकंतस्यतत्रातात्पर्यात् । तथाचसांख्यानांविहितेनिषिद्धत्वज्ञानमनर्थहितावनर्थहेतुत्वज्ञानंधर्मेचाधर्मत्वज्ञानमनुष्ठेयेचाननुष्ठेयत्वज्ञानंविपर्यासरूपोमोहः । तस्मान्मोहान्नित्यस्यकर्मणोयःपरित्यागःसतामसःपरिकीर्तितःमोहोहितमः ॥७॥ पूर्वोक्तमोहाभावेपि ॥ ॥ दुःखमित्येवयत्कर्मकायक्लेशभयात्त्यजेत् । सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत् ॥८॥ ॥ अनुपजातान्तःकरणशुद्धितयाकर्माधिकृतोपिदुःखमेवेदमितिमत्वाकायक्लेशभयान्नित्यंकर्मत्यजेदितियत्सत्यागोराजसः दुःखंहिरजः अतःसमोहरहितोपिराजसःपुरुषःतादृशंराजसंत्यागंकृत्वानैवत्यागफलंसात्विकत्यागस्यफलंनिष्ठालक्षणंनैवलभेत् ॥८॥ कर्मत्यागस्तामसोराजसश्चहेय

दर्शितः॥ कीदृशः पुनरूपादेयः सात्विकस्त्याग इत्यत उच्यते॥ ॥कार्यमित्येव यत्कर्म नियतं क्रियतेर्जुन। संगं त्यक्त्वा फलं चैव स त्यागः सात्विको मतः॥ ९॥ विध्युद्देशे फलाश्रवणेपि कार्यं कर्त्तव्यमेवेति बुध्या नियतं नित्यं कर्म संगं कर्तृत्वाभिनिवेशं फलं च त्यक्त्वैव यत्क्रियते तत्करणाशुद्धिपर्यंतं स त्यागः सात्विकः सत्वनिर्वृत्तो मत आदेयत्वेन संमतः शिष्टानां। ननु नित्यानां फलमेव नास्ति कथं फलं त्यक्त्वेत्युक्तं॥ उच्यते। अस्मादेव भगवद्वचनान्नित्यानां फलमस्तीति गम्यते। निःफलस्यानुष्ठानासंभवात्॥ तथा चापस्तंबः। तद्यथाम्रे फलार्थे निर्मिते छायागंध इत्यनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यंते। इत्यानुषंगिकं फलं नित्यानां दर्शयति। अकरणे प्रत्यवायस्मृतिश्च नित्यानां प्रत्यवायपरिहारं फलं दर्शयति। धर्मेण पापमपनुदति। तस्माद्धर्मं परमं वदंति येन केनचिद्यजेतापि वा दर्विहोमेनानुपहतमना एव भवति। तदाहुर्देवयाजी श्रेयानात्मयाजी इत्यात्मयाजीति ह ब्रूयात्। स ह वा आत्मयाजी यो वेदेदं मेनेनांगं संस्क्रियत इदं मेनेनांगमुपधीयत इत्यादिश्रुतयश्च ज्ञानप्रतिप्रबंधकपापपक्षयलक्षणं ज्ञानयोग्यतारूपपुण्योत्पत्तिलक्षणं। आत्मसंस्कारं नित्यानां कर्मणां फलं दर्शयति तदापि संधित्यक्तानि तान्यनुष्ठेयानीत्यर्थः। यदुक्तं त्यागसंन्यासशब्दौ घटपटशब्दाविव न भिन्नजातीयार्थौ किंतु फलाभिसंधिपूर्वककर्मत्यागे तयोरर्थ इति तन्नपस्मर्त्तव्यं। तच्च सत्यपि फ

एव

त्वाभिसंधौ मोहाद्वा कायक्लेशभयाद्वा यः कर्मत्यागः स विशेष्याभाववत्त्वतो विशिष्टाभावस्तामसत्वे न राज
सत्वे न च निंदितः। यस्तु सत्यपि कर्मणि फलाभिसंधित्यागः स विशेषणाभाववत्त्वतो विशिष्टाभावः
सात्विकत्वेन स्तूयत इति विशेष्याभाववत्त्वे शिं विशेषणाभाववत्त्वे च विशिष्टाभावसैत्वस्य समा
नत्वान्न पूर्वापरविरोधः॥ उभयाभाववत्तस्तु निर्गुणत्वान्न त्रिविधमध्ये गणनीय इति च बोध्यम
एतेन त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्त्तित इति प्रतिज्ञाय कर्मत्यागलक्षणे द्वे विधे दर्शयित्वा प्र
तिज्ञाननुरूपां कर्मानुष्ठानलक्षणां तृतीयां विधां दर्शयता भगवता प्रकटमकौशलमापनितं। न हि
भवति त्रयो ब्राह्मणा भोजयितव्या द्वौ कठकौण्डिन्यौ तृतीयः क्षत्रिय इति तद्वदिति परास्तं। तिसृणा ख्या
ष्टा मपि विविधानां विशिँभावरूपेण त्यागसामान्येनैकजातीयतया प्राग्व्यातत्वात्। तस्माद्भगवदकौश
लोद्भावनमेव महदकौशलमिति द्रष्टव्यं॥९॥ सात्विकस्य त्यागस्यादानाय सत्वशुद्धिद्वारेण ज्ञान
निष्ठां फलमाह॥ ॥न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते। त्यागी सत्वसमाविष्टो मेधावी छिन्नश
यः॥१०॥ यस्त्यागी सात्विकेन त्यागेन युक्तः पूर्वोक्तेन प्रकारेण कर्तृत्वाभिनिवेशं फलाभिसंधिं च त्यक्त्वां
न्तःकरणशुद्ध्यर्थं विहितकर्मानुष्ठायी स यदा सत्वसमाविष्टः सत्वेनात्मानात्मविवेकज्ञानहेतुना चित्त
गतेनातिशयेन सम्यक्ज्ञानप्रतिबंधकरजस्तमोमलराहित्येनासमंतात्फलाव्यभिचारेणाविष्टो व्या
प्तो भवति। भगवदर्पितनित्यकर्मानुष्ठानात्पापमलापकर्षलक्षणेन ज्ञानोत्पत्तियोग्यतारूपपुण्यगु
त्कौँय

णाधानलक्षणेनचसंस्कारेणसंस्कृतमंतःकरणयदाभवतीत्यर्थः।त[illegible]धावीशमदमसर्वकर्मोपरमगु
रूपसदनादिसामवायिकांगयुक्तेनम॰नन।८निदिध्यासनाख्यफलोपकार्यंगयुक्तेनचश्रवणाख्य
वेदांतवाक्यविचारेणपरिनिष्पन्नंवेदांतमहावाक्यकरणकंनिरस्तसमस्ताप्रामाण्याशंकंचिदन्या
विषयकमहंब्रह्मास्मीतिब्रह्मात्मैक्यज्ञानमेवमेधा।तयानित्यमुक्तोमेधावीस्थितप्रज्ञोभवति।तदाछि
न्नसंशयः।अहंब्रह्मास्मीतिविद्यारूपयामेधयातदविद्योच्छेदेतत्कार्यसंशयविपर्ययशून्योभवतित
दाचक्षीणकर्मत्वात्।नद्वेष्ट्यकुशलंकर्म।अशोभनंकाम्यंनिषिद्धंवाकर्मनप्रतिकूलतयामन्यते।कुश
लेशोभनेनित्येकर्मणिनानुषज्जते।नप्रीतिंकरोति।कर्तृत्वाद्यभिमानरहितत्वेनदुःखैःदुःखसत्वात्।तथाच न
श्रुतिः।भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः।क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइति।य
स्मादेवंसात्विकस्यत्यागस्यफलंतस्मान्महतापिप्रयत्नेनसएवोपादेयइत्यर्थः।।१०।।तदेवमात्मज्ञा
नवतःसर्वकर्मत्यागःसंभाव्यते।।कर्मप्रवृत्तिहेतोरागद्वेषयोरभावादित्युक्तं।असंप्रज्ञस्यकर्मत्या
गासंभवेहेतुरुच्यते।। ।।नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः।यस्तुकर्मफलत्यागीसत्यागीत्यभि
धीयते।।११।।मनुष्योहंब्राह्मणोहंगृहस्थोहमित्याद्यभिमानेनाबाधितेनदेहंकर्माधिकारहेतुवर्णा
श्रमादिरूपंकर्तृभोक्तृत्वाद्याश्रयंस्थूलंसूक्ष्मशरीरेंद्रियसंघातंबिभर्त्त्यनाद्यविद्यावासनावशा
द्व्यवहारयोग्यत्वेनकल्पितमसत्यमपिसत्यतयास्वाभिन्नमपिस्वाभिन्नतयापश्यन्धारयतिपोष

यतिचेति देहभृदबाधितकर्माधिकारहेतुदेहाभिमानस्तेनविवेकज्ञानशून्येन देहभृता कर्मप्रवृत्तिहेतुरागद्वेषपोष्कल्येन सततं कर्मसु प्रवर्त्तमानेन कर्माण्यशेषतो निःशेषेण त्यक्तुं हि यस्मान्न शक्यं न शक्यानि। सत्यां कारणसामग्र्यां कार्यत्यागस्याशक्यत्वात्। तस्माद्यस्त्वज्ञोधिकारी सत्वशुद्ध्यर्थं कर्माणि कुर्वन्नपि भगवदनुकम्पया तत्फलत्यागी भ तुशब्दस्तस्य दुर्लभत्वद्योतनार्थः। स त्यागीत्यभिधीयते॥ गौण्या वृत्त्या स्तुत्यर्थमत्याग्यपि सन्। अशेषकर्मसंन्यासस्तु परमार्थदर्शिनैवादेहभृता शक्यते कर्तुमिति स एव मुख्यया वृत्त्या त्यागीत्यभिप्रायः॥११॥

ननु देहभृतः परमात्मज्ञानशून्यस्य कर्मिणोपि कर्मफलाभिसंधित्यागित्वेन गौणसंन्यासिनः परमात्मज्ञानवतो देहाभिमानरहितस्य सर्वकर्मत्यागिनो मुख्यसंन्यासिनश्च कः फले विशेषो यदलाभेन गौणत्वमेकस्य। यल्लाभेन च मुख्यत्वमन्यस्य। कर्मफलत्यागित्वे तु द्वयोरपि तुल्यमित्यन्यो विशेषो वाच्यः॥ उच्यते॥

॥अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं। भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥१२॥

अत्यागिनां कर्मफलत्यागित्वेपि कर्मानुष्ठायिनामज्ञानां गौणसं।न्यासिनां प्रेत्य विविदिषापर्यन्तसत्वशुद्धेः प्रागेव मृतानां पूर्वस्य कर्मणः फलं शरीरग्रहणं भवति। मायामयं फल्गुतया लयमदर्शनं गच्छतीति निरुक्तेः॥ कर्मण इति जात्यभिप्रायमेकवचनं। एकस्य त्रिविधफलत्वानुपपत्तेः॥ तच्च फलं कर्मणस्त्रिविधत्वात्॥ त्रिविधं पापस्यानिष्टं प्रतिकूलवेदनीयं। नारकतिर्यगादिलक्षणं। पुण्यस्येष्टमनुकूलवेदनीयं देवादिलक्षणं। मिश्रस्य तु पापपुण्ययुगलस्य मिश्रमिष्टानिष्टसंयुक्तं मानुष्यलक्षणमित्येवं त्रिविधमित्यनुवा

दोहेयवार्य्यः॥ एवं गौणसंन्यासिनां शरीरपातादूर्ध्वं शरीरांतरग्रहणमावश्यकमित्युक्त्वा मुख्यसंन्यासि
नां परमात्मसाक्षात्कारेण विद्यातत्कार्यनिवृत्तौ विदेहकैवल्यमेवेत्याह। न तु संन्यासिनां क्वचित्। प-
रमात्मज्ञानवतां मुख्यसंन्यासिनां परमहंसपरिव्राजकानां प्रेत्य कर्मणः फलं शरीरग्रहणमनिष्ट-
मिष्टं मिश्रं च क्वचिद्देशे काले वा न भवत्येवेत्यवधारणार्थस्तु शब्दः। ज्ञानेनाज्ञानस्योच्छेदे तत्कार्याणां
कर्मणामुच्छिन्नत्वात्। तथा च श्रुतिः॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्मा-
णि तस्मिन्दृष्टे परावरे इति॥ पारमर्षं च सूत्रं। तदधिगमनुत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशा-
दिति। परमात्मज्ञानादशेषकर्मक्षयं दर्शयति। तेन गौणसंन्यासिनां पुनः संसारः॥ मुख्यसंन्यासि-
तु मोक्ष इति फले विशेष उक्तः। अत्र कश्चिदाह। अनाश्रितः कर्मफलं कार्यं कर्म करोति यः। स संन्यासी
च योगी चेत्यादौ कर्मफलत्यागिषु संन्यासिशब्दप्रयोगात्। कर्मिण एवात्र फलत्यागसाम्यात्संन्यासिशब्देन
गृह्यंते। तेषां च सात्विकानां नित्यकर्मानुष्ठानेन निषिद्धकर्माननुष्ठानेन च पापासंभवान्नानिष्टं फलं
संभवति। नापीष्टं काम्याननुष्ठानात्। ईश्वरार्पणेन फलस्यासत्त्वाच्च। अत एव मिश्रमपि नेति त्रि-
विधकर्मफलासंभवः। अत एवोक्तं। मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः॥ नित्यनैमित्तिके कु-
र्यात्प्रत्यवायजिहासयेति। स वक्तव्यः। शब्दस्यार्थस्य च मर्यादा न निरधारि भवतेति। तथाहि। गौ

णामुख्ययोर्मुख्ये कार्यसंप्रत्यय इति शब्दमर्यादा। यथाऽमावास्यामपराह्णे पिंडपितृयज्ञेनाचरंतीत्यत्रामावास्याश
ब्दः काले मुख्यः तत्कालोत्पन्ने कर्मणि च गौणः य एवं विद्वानमावास्यां यजत इत्यादौ। तत्रामावास्यायामिति क
र्मग्रहणे पितृयज्ञस्य तदंगत्वान्न फलं कल्पनीयमिति विधेर्लाघवमिति पूर्वपक्षितं कात्यायनेन। अंगं वा स
~~ज्ञस्य~~ मभिव्याहारादिति गौणार्थस्य मुख्यार्थोपस्थितिपूर्वकत्वान्मुख्यार्थस्य चेहाबाधादमावास्याशब्दे
न काल एव गृह्यते फलकल्पनागौरवं नूत्तरकालीनं प्रमाणवत्वादंगीकार्यमिति सिद्धांतितं जैमिनिना। पितृय
ज्ञः स्वकालत्वादनंगं स्यादिति। एवं स्थिते संन्यासिशब्दस्य सर्वकर्मत्यागिनि मुख्यत्वात्कर्मणि च फलत्यागसा
म्येन गौणत्वान्मुख्यार्थस्य चेहाबाधात्तस्यैव संन्यासिशब्देन ग्रहणमिति शब्दमर्यादया सिद्धं। सत्यां का
रणसामग्र्यां कार्योत्पाद इति चार्थमर्यादा। तथाहि। ईश्वरार्पणेन त्यक्तकर्मफलस्यापि सत्वशुद्ध्यर्थं नित्या
नि कर्माण्यनुतिष्ठतोंतराले मृतस्य प्रागर्जितैः कर्मभिस्थिविघ्नं शरीरग्रहणं केन वार्यते। यो वा एतदक्षरं गा
र्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः। अतः सत्वशुद्धिफलज्ञानोत्पत्त्यर्थं तदधिकारिशरीर
मपि तस्यावश्यकमेवात एव विविदिषासंन्यासिनः श्रवणादिकं कुर्वतोंतराले मृतस्य योगभ्रष्टशब्द
वाच्यस्य शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते इत्यादिनाऽज्ञानाधिकारिशरीरप्राप्तिरवश्यं
भाविनीति निर्णीतं षष्ठे। यत्र सर्वकर्मत्यागिनोप्यज्ञस्य शरीरग्रहणमावश्यकं तत्र किं वक्तव्या १

17

मज्ञस्य कर्मणि इति तस्मादज्ञस्यावश्यं शारीरग्रहणमित्यर्थमर्यादया सिद्धं। पराक्रांतं चैकभविकपक्षनिराकरणेसूरिभिः। तस्माद्यथोक्तंभगवत्पूज्यपादभाष्यकृतं व्याख्यानमेव ज्यायः। तदयमत्र निष्कर्षः। अकर्त्रभोक्तृपरमानंदाद्वितीयसत्यस्वप्रकाशब्रह्मात्मसाक्षात्कारेण निर्विकल्पेन वेदांतवाक्यजन्येन विचारनिश्चितप्रामाण्येन सर्वप्रकाराप्रामाण्यशंकाशून्येन ब्रह्मात्मज्ञाननिवर्त्तितकार्यकर्तृत्वाद्यभिमानरहितः परमार्थसंन्यासी सर्वकर्मदिदोच्छुद्धः सन्नविद्याकर्मादिनिमित्तं पुनः शारीरग्रहणमनुभवति। सर्वभ्रमाणां कारणोच्छेदेनोच्छेदात्। यस्त्वविद्यावान्कर्तृत्वाद्यभिमानी देहाद्यत्सचिविद्यः। रागादिदोषप्राबल्यात्। काम्यनिषिद्धादियथेष्टकर्मानुष्ठायी मोक्षशास्त्रानधिकार्येकः। अपरस्तु यः प्राक्कृतसुकृतवशात्किंचित्प्रक्षीणरागादिदोषः सर्वाणि कर्माणि सक्रु॰मत्राकुर्वन्निषिद्धानि काम्यानि च परित्यज्य नित्यानि नैमित्तिकानि च कर्माणि फलाभिसंधित्यागेन सत्वशुद्ध्यर्थमनुतिष्ठन्। गौणसंन्यासी मोक्षमोक्षशास्त्राधिकारीति द्वितीयः। सः ततो नित्यनैमित्तिककर्मानुष्ठानेनांतःकरणशुद्ध्या समुपजातविविदिषः श्रवणादिना वेदनं मोक्षसाधनं संपिपादयिषुः सर्वाणि कर्माणि विधितः परित्यज्य ब्रह्मनिष्ठं गुरुमुपसर्पति विविदिषासंन्यासी समुख्यस्तृतीयः। तत्राद्यस्य संसारित्वं सर्वप्रसिद्धं। द्वितीयस्य त्वनिष्टमित्यादिना व्याख्यातं। तृतीयस्य

नुभयत्तुतिः श्रद्धयोपेतस्य इति प्रश्नमुत्थाप्य निर्णीतं षष्ठे। अज्ञस्य संसारित्वं ध्रुवं कारणसामग्र्याः स
त्वात्। न तु कस्यचिज्ज्ञानाननुगुणं। कस्यचिज्ज्ञानानुगुणमिति विशेषः। विज्ञस्य संसारकारणाभा
वात् स च तैरेव कैवल्यमिति द्वौ पदार्थौ सुचितावस्मिन्लोके॥१२॥ तत्रात्मज्ञानरहितस्य संसारित्वे हे
तुः कर्मत्यागासंभव उक्तः। न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषत इति। तत्राज्ञस्य कर्मत्यागासंभ
वे को हेतुः। कर्महेतावधिष्ठानादिपंचकतादात्म्याभिमान इति मत्वा चतुर्भिः श्लोकैः प्रपंचयति।
तत्र प्रथमेनाधिष्ठानादीनि पंच वेदांतप्रमाणप्रोक्तानि हेयत्वार्थमवश्यं ज्ञातव्यानीत्याह॥ ॥पंचै
तानि महाबाहो कारणानि निबोध मे। सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां॥१३॥ इमानि व
क्ष्यमाणानि पंच सर्वकर्मणां सिद्धये निष्पत्तये कारणानि निर्वर्तकानि हे महाबाहो मे मम परमाप्तस्य
वचनान्निबोध बोधुं द्धुं सावधानो भव। न ह्ययं तदुर्ज्ञानान्येतानि अनवहितचेतसा शक्यते ज्ञातुमि
ति चेतःसमाधाने विधानेन तानि स्तौति। महाबाहुत्वेन च सत्पुरुष एव शक्तो ज्ञातुमिति सूचयति
स्तुत्यर्थमेव। किमेतान्यप्रमाणकान्येव तववचनाद्ज्ञेयानि नेत्याह। सांख्ये कृतांते प्रोक्तानि। निर
तिशयपुरुषार्थप्राप्त्यर्थं सर्वानर्थनिवृत्त्यर्थं च ज्ञातव्यानि जीवब्रह्मणोरैक्यं तद्बोधोपयोगि
नश्च श्रवणादयः पदार्थाः। संख्यायंते व्युत्पाद्यंते अस्मिन्निति सांख्यं वेदांतशास्त्रं तस्मिन् नात्मव १०

19

त्मकमात्रप्रतिपादकेकिमर्थमनात्मभूतान्यवश्यानिलोकप्रसिद्धानिचकर्मणांकारणानिपंचप्रतिपाद्यंत
इस्यतःशास्त्रविशेषणं।कृतांतइति।कृतमितिकर्मोच्यतेतस्यांतःपरिसमाप्तिस्तत्वज्ञानोत्पत्यायत्रतत्
यस्मिन्कृतांतेशास्त्रेप्रोक्तानिप्रसिद्धान्येवलोकेऽनात्मभूतान्येवात्मतयामिथ्याज्ञानारोपेणगृहीतान्यो
न्यात्मतत्वज्ञानबाधसिद्धयेहयत्नेनोक्तानियदाह्यन्यधर्मःस्वकर्मात्मन्यविद्ययाध्यारोपितमित्यु
च्यते।तदास्तुह्यात्मज्ञानेनतद्बाधात्कर्मणोंतःकृतोभवति।अतआत्मनःकर्मासंबंधप्रतिपादनाया
नात्मभूतान्येवपंचकर्मकारणानिवेदांतशास्त्रेमायाकल्पितान्यनूदितानीतिनाद्वैतात्ममात्रतात्पर्य
हानिस्तेषांतदंगत्वेनैवतत्प्रतिपादनात्।इहापिचसर्वकर्मांतत्वंज्ञानस्यप्रतिपादितं।सर्वंकर्माखिलं
पार्थज्ञानेपरिसमाप्यतइति।तस्माज्ज्ञानशास्त्रस्यकर्मांतत्वमुपपन्नं॥१३॥प्रमाणमूलानिकर्मका
रणानिपंचआत्मनोऽकर्तृत्वसिद्ध्यर्थंहियत्नेनज्ञातव्यानीत्युक्तेकानितानीत्यपेक्षायांतत्स्वरूपमाह
द्वाभ्यां॥ ॥अधिष्ठानंतथाकर्ताकरणंचपृथग्विधं।विविधाश्चपृथक्चेष्टादैवंचैवात्रपंचमं॥१४॥
इच्छाद्वेषसुखदुःखचेतनाद्यभिव्यक्तेराश्रयोऽधिष्ठानंशरीरं।तथाकर्तायथाधिष्ठानंमनात्मासाभौ
तिकंमायाकल्पितंस्वाप्नगृहरथादिवत्।तथाऽहंकरोमीत्याद्यभिमानवान्ज्ञानशक्तिप्रधानोपं
चीकृतपंचमहाभूतकार्योहंकारोंतःकरणंबुद्धिर्विज्ञानमित्यादिपर्यायशब्दवाच्यस्तादात्म्या

ध्यासेनात्मनिकर्तृत्वादिधर्माध्यारोपहेतुरनात्माभौतिकोमायाकल्पितश्चेतितथाशब्दार्थः स्थूलशरी
रस्यलोकायतिकैरात्मत्वेनपरिगृहीतस्याप्यन्यैः परीक्षकैरनात्मत्वेननिश्चयात्तद्दृष्टांतेनतार्किका
दिभिरात्मत्वेनपरिगृहीतस्यकर्तुरप्यनात्मत्वनिश्चयस्सुकरइत्यर्थः।करणंचश्रोत्रादिशब्दाद्यु
पलब्धिसाधनं।चशब्दस्तथेत्यनुकर्षार्थः।पृथग्विधंनानाप्रकारंचज्ञानेंद्रियाणिपंचकर्मेंद्रि
णिमनोबुद्धिश्चेतिद्वादशसंख्यंकरणवर्गंमनोबुद्धिश्चेतिवृत्तिविशेषाद्वृत्तिमांस्त्वहंकारः॥क
र्त्रैवचित्तादाश्चासस्तत्रसर्वत्रैवाविशिष्टः।विविधाःनानाप्रकाराःपंचधादशधाप्रसिद्धाःचशब्दस्त
थेत्यनुकर्षार्थः पृथगसंकीर्णाश्चेष्टाःक्रियारूपाःक्रियाशक्तिप्रधानापंचीकृतपंचमहाभू
तकार्याःक्रियाप्राधान्येनवायवीयत्वेनव्यपदिश्यमानाः प्राणापानव्यानोदानसमानाःनाग
कूर्मकृकलदेवदत्तधनंजयाख्याश्चतदंतर्भूताएव।अत्रचसुषुप्तावंतःकरणस्यकर्तुर्लयेपिप्रा
णव्यापारदर्शनात्तद्व्यपदेशाच्चांतःकरणादत्यंतंभिन्नएवप्राणइतिकेचित्॥क्रियाशक्तिज्ञा
नशक्तिमदेकमेवजीवत्वोपाधिभूतमपंचीकृतपंचमहाभूतकार्यंक्रियाशक्तिप्राधान्येनप्राणइ
तिज्ञानशक्तिप्राधान्येनचांतःकरणमितिव्यपदिश्यतइत्यपियुक्ताः।सईक्षांचक्रेकस्मिन्नहमु ११

क्रांतेउत्क्रांतोभविष्यामिकस्मिन्वाप्रतिष्ठितेप्रतिष्ठास्यामीतिसप्राणमसृजेतिश्रुतावुत्क्रांत्याद्युपा
धित्वंप्राणस्योक्तं।तथासधीःस्वप्नोभूत्वेमंलोकमतिक्रामतिमृत्योरूपाणिध्यायतीवलेलायतीवेत्या
दिश्रुतावुत्क्रांत्याद्युपाधित्वंबुद्धेरुक्तंस्वतंत्रोपाधिभेदेचजीवभेदप्रसंगः।तस्माद्बुद्धिप्राणयोरे
कत्वेनैवोत्क्रांत्याद्युपाधित्वंयुक्तं।भेदव्यपदेशस्त्वशक्तिभेदात्।सुषुप्तौचज्ञानशक्तिभागलयेपि=
भ क्रियाशक्तिभागदर्शनमेकत्वेपिनविरुद्धमनुभवसिद्धत्वात्।दृष्टिसृष्टिलयेसर्वलयेपिप्राणव्या
पारवच्छरीरस्यसुषुप्तायमित्येवंरूपेणपरैःकल्पितत्वाच्च।तस्मादुभयथापिव्यपदेशभेदउप
पन्नः।दैवंचानुग्राहकदेवताजातंचशब्दस्तथेस्यनुकर्षणार्थः।अत्रचकारपावर्गेपंचमपंचसं
ख्यापूरणं।एवशब्दस्तथाशब्देनसंबध्यमानोऽनात्मत्वभौतिकत्वकल्पितत्वाद्यवधारणार्थः
पंचानामपितस्यैवशरीरस्यकर्तृकरणक्रियाधिष्ठानस्यदेवतापृथिवीयत्रास्यपुरुषस्यमृतस्या
२ ग्निंवागप्येतिवातंप्राणश्चक्षुरादित्यंमनश्चंद्रंदिशःश्रोत्रंपृथिवीशरीरमितिश्रुतौवागाद्यधि
ष्ठात्र्यग्न्यादिभिःसहशरीराधिष्ठातृत्वेनपृथिवीपाठात्।कर्तुरहंकारस्याधिष्ठात्रीदेवता
रुद्रःपुराणादिप्रसिद्धःकरणानांचाधिष्ठात्र्योदेवताःसुप्रसिद्धाः।श्रोत्रत्वक्चक्षूरसनघ्राण

नां दिग्वातार्कप्रचेतोऽश्विनः। वाक्पाणिपादपायूपस्थानां वह्नीन्द्रोपेन्द्रमित्रप्रजापतयः। मनोबुध्योश्चंद्र
बृहस्पती इति। पंचप्राणानां क्रियारूपाणां सद्योजातवामदेवाघोरतत्पुरुषेशानाः पुराणप्रसिद्धाः।
भाष्ये देवमादित्यादि चक्षुराद्यनुग्राहकमित्याद्यधिष्ठानादिदेवतानामप्युपलक्षणं॥१४॥ स्वरू
पमुक्त्वा तेषां पंचानां कर्महेतुत्वमाह॥ तृतीयेन॥ ॥शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः॥ न्या
य्यं वा विपरीतं वा पंचैते तस्य हेतवः॥१५॥ ॥शारीरं वाचिकं मानसिकं च विधिप्रतिषेधसिद्धलक्षणं
त्रिविधं कर्म धर्मशास्त्रेषु प्रसिद्धं। अक्षपादेन चोक्तं। प्रवृत्तिर्वाग्बुद्धिशरीरारंभ इति। बुद्धिर्मनः॥ =
अतः प्राधान्याभिप्रायेणोच्यते। शरीरेण वाचा मनसा वा यत्कर्म प्रारभते निर्वर्त्तयति नरः। मनुष्या
धिकारत्वाच्छास्त्रस्य। कीदृशं कर्म न्याय्यं वा शास्त्रीयं धर्म्यं विपरीतं वा अशास्त्रीयमधर्म्यं। यच्च
निमिषितचेष्टितादि जीवनहेतुरन्यदा विहितप्रतिषिद्धसमं तत्सर्वं पूर्वकृतधर्माधर्मयोरेव कार्य
मिति न्याय्यविपरीतयोरेवांतर्भूतं। पंचैते यथोक्ता अधिष्ठानादयस्तस्य सर्वस्यैव कर्मणो हेतवः
कारणानि॥१५॥ इदानीमेतेषामेव कर्मकर्तृत्वादात्मनोऽनकर्त्तृत्वमित्यधिष्ठानादिनिरूपणफ
लमाह॥ ॥तत्रैवं सति कर्तारमात्मानं केवलं तु यः॥ पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥१६॥

तत्र कर्माणि प्रागुक्ते सर्वस्मिन्। एवं सत्यधिष्ठानादिपंचहेतुके सति तैर्निर्वर्त्यमाने आत्मानं सर्वज्ञ उप्रपंच=
स्यभासकं सत्तास्फूर्तिरूपं स्वप्रकाशे परमानंदमबाध्यं केवलमसंगोदासीनमकर्त्तारमविक्रियमद्विती-
यं तु एव परमार्थतः। अविद्ययात्वधिष्ठानादौ प्रतिबिंबत्मादित्यमिव तोये तद्भासकमनन्यत्वेन परिक-
ल्प्यतो यच्चलनेनादित्यश्चलतीतिवदधिष्ठानादिकर्मणाहमेव कर्त्तेति साक्षिणमपि संतं कर्त्तारं कि-
याश्रयं यः पश्यत्यविद्यया कल्पयति रज्जुमिव भुजंगं। स एवं पश्यन्नपि न पश्यत्यात्मानं तत्त्वेन। स्वरू-
पाज्ञानकृतत्वादध्यासस्य। स्वाध्यासाद्विपरीतमेव पश्यति न यथा तत्त्वमित्यत्र को हेतुरत आह। अकृ-
तबुद्धित्वात्। शास्त्राचार्योपदेशन्यायैरनुपजनितविवेकबुद्धित्वात्। न हि रज्जुतत्त्वसाक्षात्काराभा-
वे भुजंगभ्रमं कश्चन न बाधते। एवं शास्त्राचार्योपदेशन्यायैः परिनिष्ठितेऽहमस्मि सत्यंज्ञान=
मनंतमकर्त्रभोक्तृ परमानंदमनवच्छमद्वयं ब्रह्मेति साक्षात्कारेनुपजनिते कुतो मिथ्याज्ञानतत्का-
र्यबाधः। एतादृशं साक्षात्कारमेव गुरुमुपसृत्य वेदांतवाक्यविचारेण कुतो न जनयति ३स८ त
आह। दुर्मतिः। दुष्टाविवेकप्रतिबंधकपापेन मलिना मतिर्यस्य सः। अतोऽशुद्धबुद्धित्वान्नित्या-
नित्यवस्तुविवेकादिशून्यत्वेन तत्त्वज्ञानायोग्यत्वादकर्त्तारमपि कर्त्तारं केवलमप्यकेवलमात्मा-

नमविद्यया कल्पयन्संसारी कर्माधिकारी देहादावकृतबुद्धिः कर्मकर्तृषु तादात्म्याभिमानात्कर्मत्यागासम
र्थः सर्वदा जननमरणप्रबंधेनानिष्टमिष्टं मिश्रं च कर्मफलमनुभवति। एतेन यस्तार्किको देहादिव्यतिरि
क्तमात्मानमेव कर्तारं केवलं पश्यति सोप्यकृतबुद्धित्वेन व्याख्यातः। अन्यस्त्वाह। आत्मा केवलो न
कर्ता किंत्वधिष्ठानादिभिः संहतः सन्परमार्थतः कर्तैव कर्तारमात्मानं केवलं पश्यन्दुर्मतिरिति
केवलशब्दप्रयोगादिति। तन्न परमार्थतः सर्वक्रियाशून्यस्यासंगस्यात्मनोधिष्ठानादिभिः संह
तत्वानुपपत्तेः। जलसूर्यकादिवत्त्वाविद्यकेन संहतत्वेन कर्तृत्वमपि तादृशमेव। अधिष्ठानादीना
मप्याविद्यकत्वाच्च। केवलशब्दस्तु स्वभावसिद्धमात्मनोऽसंगाद्वितीयरूपत्वमनुवदति। कर्तृ
त्वदर्शिनो दुर्मतित्वहेतुत्वेनेत्यदोषः॥१६॥ तदेवं चतुर्भिः श्लोकैरनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः
फलं भवत्यत्यागिनां प्रेत्येति चरणत्रयं व्याख्यातमिदानीं न तु संन्यासिनां क्वचिदिति तुरीयं चर
णमेकेन व्याचष्टे॥ ॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥ हत्वापि स इमाल्लोकान्न हं
ति न निबध्यते॥१७॥ यस्य पूर्वोक्तविपरीतस्य पुण्यैः कर्मभिः क्षपितेषु विवेकविरोधिपापेषु नित्या
नित्यवस्तुविवेकादिसाधनचतुष्टयं प्राप्तवतः शास्त्राचार्योपदेशन्यायजनिताकर्त्रभोक्तृस्वप्रका
शपरमानंदाद्वितीयब्रह्मात्मसाक्षात्कारस्य ज्ञानेन सकार्यैर्बाधितेनभवसहं कर्तेत्येवंरूपो भावः प्रत्ययः

25

यस्यभावः सङ्गश्च अहंकृतोहमितिव्यपदेशार्हो न । अहंकारबाधेन शुद्धस्वरूपमात्रपरिशेषादिति वा । अहंकृतोऽहंकारस्य भावस्तत्तादात्म्यं यस्य न विवेकेन बाधितत्वादिति वा ॥ बाधितानुवृत्तावपिस्त एव पं
चाधिष्ठानादयो मायया मायिसर्वात्मनि कल्पिताः सर्वकर्मणां कर्त्तारो मया स्वप्रकाशचैतन्येनासंगे
नकाल्पितसंबंधेन प्रकाश्यमाना अहं तु न कर्त्ता किंतु कर्त्तृतद्व्यापाराणां साक्षिभूतः क्रियाज्ञानशक्ति
मदुपाधिद्वयनिर्मुक्तः शुद्धः सर्वकार्यकारणासंबद्धः कूटस्थनित्यो निर्द्वयः सर्वविकारशून्यः अ
संगो ह्ययं पुरुषः साक्षिचेता केवलो निर्गुणश्च । अप्राणो ह्यमनाः शुभ्रो अक्षरात्परतः परः । अज आ
त्मा महान्ध्रुवः । सलिल एको द्रष्टाऽद्वैतः । अजो नित्यः शाश्वतोयं पुराणः निष्कलं निष्क्रियं शांतं निर
वद्यं निरंजनमित्यादिश्रुतिभ्यः । अविकार्योयमुच्यते । प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्त्ताहमिति मन्यते । तत्त्ववित्तु न सज्जते ॥ शरीरस्थोपि कौंतेय न करोति न लिप्य
ते इत्यादिस्मृतिभ्यश्च । तस्मान्नाहं कर्त्तेत्येवं परमार्थदृष्टेः बुद्धिरंतःकरणं यस्य न लिप्यते नानुश
यिनी न भवति । इदमहमकार्षमेतत्फलं भोक्ष्य इत्यनुसंधानं कर्त्तृत्ववासनानिमित्तं लेपोनुशयः
सच्च पुण्ये कर्मणि हर्षरूपः पापे पश्चात्तापरूपः । ईदृशेन द्विविधेनापि लेपेन बुद्धिर्न युज्यते । कर्त्तृ
त्वाभिमानबाधात् । तथा च ज्ञानिनं प्रकृत्य श्रुतिः । एतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः

कल्याणमकरवमित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः। तदेतदृचाभ्युक्तं एष नित्यो महिमा ब्राह्मण
स्य वर्द्धते न कर्मणा नो कनीयान्। तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेतीति पापकेनेति पु
ण्यस्याप्युपलक्षणं। वर्द्धते कनीयानिति च पापपुण्ययोः परितोषपरितापाभिप्रायं। एवं यस्य नाहंकृ
तो भावो बुद्धिर्यस्य न लिप्यते स पूर्वोक्तदुर्मतिविलक्षणः सुमतिः परमार्थदर्शी पि स्वस्य कर्त्तारमात्मानं के
वलं स कर्त्तृत्वाभिमानाभावादनिष्टादित्रिविधधर्मफलभागी न भवतीत्येतावति शास्त्रार्थे अहंकारा
भावबुद्धिलेपाभावौ स्तोतुमाह। हत्वापि स इमाँल्लोकान्सर्वान्प्राणिनो न हन्ति हननक्रियायाः
कर्त्ता न भवति। अकर्त्तृस्वरूपसाक्षात्कारात्। न निबध्यते। नापि तत्कार्येणाधर्मफलेन संबध्यते। अ
त्र नाहंकृतो भाव इत्यस्य फलं न निहंतीति। बुद्धिर्न लिप्यत इत्यस्य फलं न निबध्यत इति। अनेन च कर्मा
लेपप्रदर्शने ऽतिशयमात्रमुक्तं न तु सर्वप्राणिहननं संभवति। हत्वापीति कर्त्तृत्वाभ्यनुज्ञा बाधितकर्त्तृ
त्वदृष्ट्या लौकिक्या न हंतीति कर्त्तृत्वनिषेधः। शास्त्रीयया परमार्थदृष्ट्येति न विरोधः। शास्त्रादौ नायं
हंति न हन्यत इति सर्वकर्मासंस्पर्शित्वमात्मनः प्रतिज्ञाय न जायत इत्यादिहेतुवचनेन साधयित्वा वेदा
विनाशिनमित्यादिना विदुषः सर्वकर्माधिकारनिवृत्तिः संक्षेपेणोक्ता मध्ये च तेन तेन प्रसंगेन प्रसा
रितेह शास्त्रार्थेतावत्त्वप्रदर्शनायोपसंहृता न हंति न निबध्यत इति। एवं चाविद्याकल्पितानाम

धिष्ठानाद्यनात्मदृष्टानां सर्वेषामपि कर्मणामात्मविद्यया समुच्छेदोपपत्तेः। परमार्थसंन्यासिनाम् निष्टादि
त्रिविधं कर्मफलं न भवतीत्युपपन्नं। परमार्थसंन्यासश्चाकर्त्रात्मसाक्षात्कार एव। जनकादीनामेतादृश
संन्यासित्वेपि बलवत्प्रारब्धकर्मवशाद्बाधितानुवृत्त्या परपरिकल्पनया वा कर्मदर्शनं न विरुद्धं। परम
हंसानामीदृशानां भिक्षाटनादिवत्। अतएव ज्ञानफलभूतो विद्वत्संन्यास उच्यते। साधनभूतस्तु विवि
दिषासंन्यासो नैवंविधोपि प्रथममुत्तरकाले ज्ञानोत्पत्तावेवंविधो भवतीति वक्ष्यते॥१७॥ पूर्वमधिष्ठाना
दिपंचकस्य क्रियाहेतुत्वेनात्मनः सर्वकर्मासंस्पर्शित्वमुक्तं। संप्रति तमेवार्थं ज्ञानज्ञेयादिप्रक्रिया
रचनया त्रैगुण्यभेदव्याख्यायाश्च विवरितुमुपक्रमते॥ ॥ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोद
ना। करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः॥१८॥ ज्ञानं विषयप्रकाशक्रिया। ज्ञेयं तस्य कर्म परि
ज्ञाता। तस्याश्रयो भोक्ता तःकरणोपाधिपरिकल्पितः। एतेषां त्रयाणां सन्निपाते हि हानोपादा
त नादिसर्वकर्मारंभः स्यादतएव त्रयं सर्वेषां कर्मणां प्रवर्त्तकं वैंचेनमाहुरिति शाबरे। चोदना चोप
देशश्च विधिश्च तदेतदाह त्रिविधा कर्मचोदनेति प्रवर्त्तकमुच्यते। चोदनेति क्रियायाः प्रवर्त्तकं
वचनमाहुरिति शाबरे। चोदना चोपदेशश्च विधिश्चैकार्थवाचिन इति। भाट्टैश्च वचनेन हि

यात्प्रवर्त्तकवचनत्वंयद्यपिचोदनापदेशाक्यतयाप्रतीयतेतथापिवचनत्वंविहायप्रवर्त्तकमात्रमिहलक्ष्य
तेज्ञानादिषुवचनत्वाभावात्।एवंचप्रेरणीयत्वंप्रेरकत्वंचानात्मनएवनोत्मनइत्यभिप्रायः।तथाक
रणंसाधकतमंबाह्यंश्रोत्राद्यंतरचबुध्यादि।कर्मकर्तुरीप्सिततमंक्रियया व्याप्यमानं।उत्पाद्यमाद्यं
विकार्यंसंस्कार्यंच॥कर्त्ताच।इतरकारकाप्रयोज्यत्वेसतिसकलकारकाणांप्रयोक्ताक्रियायाःनिर्वर्त्त
कश्चिदचिद्रूपिरूपइतित्रिविधस्त्रिप्रकारः।कर्मसंगृह्यतेसमवेत्यचेतिकर्मसंग्रहः।कर्माश्रयः॥
चकाराद्यादितिशब्दात्संप्रदानमपादानमधिकरणंचशरीरत्रयांतर्भूतं।एवंकारकषट्कमेवत्रिवि
धंक्रियायाःआश्रयोनतुकूटस्थआत्मेत्यर्थः।कर्मप्रेरकस्यकर्माश्रयस्यचकारकरूपत्वाच्चै
गुण्यात्मकत्वाख्याकारकस्वभावोगुणातीतस्त्वात्मासर्वकर्मासंस्पर्शीत्यभिप्रायः।अथवाज्ञानं
ज्ञानस्य प्रेरणारूपंलिंगादिशब्दजन्यं।ज्ञेयंतस्यविषयत्वेनलिंगादिशब्दस्वरूपंप्रेरकं।परिज्ञातातस्य
ज्ञानस्याश्रयःप्रेरणीयः।इत्येवंत्रिविधाकर्मचोदना।कर्मक्रियापुरुषव्यापाररूपाऽर्थभा
वनातद्विषयाचोदनाप्रेरणाविधिरूपाशाब्दीभावनेत्यर्थः।तथाकरणंसेतिकर्त्तव्यताकंसाध
नंधात्वर्थः।कर्मभाव्यंस्वर्गादिफलं।कर्त्ताफलकामनावान्पुरुषःक्रियायाःनिर्वर्त्तकइत्येवंत्रि
विधःकर्मसंग्रहः।कर्मणःपुंव्यापाररूपस्यार्थभावनायाःसंग्रहःसंक्षेपः।तदेवमर्थभाव १९

ष्यं
का

29

वा

नारूपपुंप्रयत्नस्यविधेयस्याभावाँच्छब्दभावनारूपोविधिर्नशुद्धमात्मानंगोचरयति।कारकाश्रयत्वाद्वि
धिविधेययोः॥तदुक्तं।त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुनेति।कारकाणांचत्रैगुण्यरूपत्वमनेनत
रमेवव्याख्यास्यतइत्याभिप्रायः॥अत्रप्रसंगाद्विधिशब्दितंप्रवर्त्तनाप्रवृत्तिहेतुत्वेनप्रेरणातावत्सर्वलोका
ननुभवप्रसिद्धा।राज्ञाप्रेरितोबालेनप्रेरितोब्राह्मणेनप्रेरितोहमितिहिप्रवर्त्तमानावक्तारोभवंति।
साचप्रवर्त्तनाप्रवर्त्तकराजादिनिष्ठा।तत्रोत्कृष्टस्यनिकृष्टंप्रतिप्रवर्त्तनाआज्ञाप्रेरणेतिचोच्यते॥
निकृष्टस्योत्कृष्टंप्रतिप्रवर्त्तनायाच्याऽध्येषणेतिचोच्यते।समस्यसमंप्रत्युत्कर्षनिकर्षौदासीन्ये
नप्रवर्त्तनाऽनुज्ञानुमतिरितिचोच्यते।तेचाज्ञादयोज्ञानविशेषाइच्छाविशेषावाचेतनधर्माएव
लोकेनप्रसिद्धाः।वेदेतुविधिनाहंप्रेरितःकरोमीतिव्यवहर्त्तारोभवंति।तत्रस्वयमचेतनत्वाद
पौरुषेयत्वाच्चवैदिकस्यविधेर्नचेतनधर्मेणाज्ञादिनाप्रेरकतासंभवति।अतःस्वधर्मेणैवसाप्युप
गंतव्यागत्यंतरासंभवात्।सएवधर्मःचोदनाप्रवर्त्तनाप्रेरणाविधिरूपदेशःशब्दभावनेतिचो
च्यते।तत्रकेचिदलौकिकमेवशब्दव्यापारंकल्पयंति।अन्येतुक्लृप्तेनैवोपपत्तौनालौकिककल्प
नांसहंते।प्रवर्त्तीहिप्रवृत्तिहेतुर्व्यापारः।विधिशब्दस्यव्याख्यानेत्वेनदशलकारसाधारणोनो
पाधिनापुरुषप्रवृत्तिरूपार्थभावनांप्रतिवाचकत्वंतज्ज्ञानहेतुत्वमितियावत्।साचज्ञातेवानु

च

ना

ष्ठातुंशक्यतेइति।तद्धिहेतोरपिशब्दस्यतद्धेतुत्वंपरंपरयाभवत्येव।तत्रविधिशब्दस्यपुरुषप्रवृत्ति
रूपभावनाज्ञानहेतुर्व्यापारस्तद्वाचकशक्तिमत्तयाविधिशब्दज्ञानंसएवचतस्यप्रवृत्तिहेतुर्व्यापार
इतिप्रवर्त्तनाभिधानीयकंलभते॥ज्ञानद्वारेणैवशब्दस्यप्रवृत्तिजनकत्वात्।ज्ञानजनकव्यापारा
तिरिक्तव्यापारकल्पनेमानाभावात्।ज्ञानजनकव्यापारस्तस्यस्वज्ञानंशक्तिज्ञानंशक्तिविशि श्र
ष्टस्वज्ञानंचातत्राद्ययोरन्यतरस्यशाब्दभावनात्वं।तृतीयस्यतुकारणत्वमितिविवेकः।एवंस्थिते
निष्कर्षः।विधिनास्वज्ञानंजन्यते।प्रवर्त्तनात्वेनाभिधीयतेपीतिविधिज्ञानमेवशाब्दभावना।न
स्याच्चपुरुषप्रवृत्तिरूपार्थभावनैवभाव्यतयान्वेति।करणतयाचप्रवृत्तिवाचकशक्तिमद्विधिज्ञा
नमेवभावनासाध्यस्यापिफलाविच्छिन्नांभावनांप्रतिकरणत्वंफलकरणत्वादेवयागस्येवस्वर्ग
२ भावनांप्रतिनविरुध्यते।तथाचपुरुषःस्वप्रवृत्तिंभावयेत्।केनेत्यपेक्षायांपुरुषप्रवृत्तिवाचकश
क्तिमत्तयाज्ञातेनविधिशब्देनेतिकरणांशपूरणं।कथमित्याकांक्षायामर्थवादैस्स्तुतत्वेतीतिकर्तव्य
तांशपूरणं।इयंगौःक्रय्येतिलौकिकेविधौबहुक्षीराजीवद्वत्सा[illegible]पयासमांसमीनासागौ
र्यप्रतिवर्षंप्रसूयतेमीनेत्यादिलौकिकार्थवादवत्।नन्वाख्यातत्वेनविधिशब्दादुपस्थितापुरुष १८
प्रवृत्तिर्भाव्यतयान्वेतु।करणंतुकथमनुपस्थितमन्वेति।उच्यते।विधिशब्दस्तावच्छ्रवणे

31

नोपस्थापितस्तस्यपुरुषप्रवृत्तिवाच्चकशक्तिरपिस्मरणेनोपस्थापितातदुभयवैशिष्ट्यंतन्निष्ठाज्ञातताचमननसेतिवाच्चकशक्तिमत्तयाज्ञातोविधिशब्दउपस्थितएव। अनेनयच्छक्त्युपात्तज्ञावयेदितिप्रतिशब्दंस्वाध्यायविधिनात्सर्यच्छब्दातिरिक्तेवोपस्थितमपिशाब्दबोधेभासतएव। यथाज्योतिष्टोमादिनामधेयंयथावालिंगविनियोज्योमंत्रः। तदुक्तमाचार्यैरुद्भिदधिकरणेऽनुपस्थितविशेषणाविशिष्टबुद्धिर्भवति। नत्वनभिहितविशेषणेति। एवमर्थवादानामुपस्थितिःश्रोत्रेण। प्राशस्त्यस्यतुतैरेवलक्षणया। तदुभयनिष्टज्ञाततायास्तुमननसेत्यर्थवादैःप्रशस्तत्वेनज्ञातत्वेनेतिकर्तव्यतांशान्वयोप्युपपन्नएव। ननुकिंप्राशस्त्यं। नतावत्फलसाधनत्वं। तस्ययागेनभावयेत्स्वर्गमित्यर्थभावनान्वयवशेनविधिवाक्यादेवलब्धत्वात्। नान्यवत्। प्रवृत्तावनुपयोगात्। उच्यते। बलवदनिष्टाननुबंधित्वंप्राशस्त्यं। तच्चनेष्टहेतुत्वज्ञानाल्लभ्यते। इष्टहेतावपिकलंजभक्षणादावनिष्टहेतुत्वस्यापिदर्शनात्। विहितश्येनफलस्यचशत्रुवधस्यानिष्टानुबंधित्वंदृष्टं। अतोयागत्वसाधनस्यफलस्यवानिष्टाहेतुत्वेनोच्यते। तावदिष्टहेतुत्वेनज्ञातेपितत्रपुरुषोनप्रवर्त्तते। अतएवोक्तं। फलतोपिचयत्कर्मनानर्थेनानुबध्यते। केवलप्रीतिहेतुत्वात्तद्धर्म

त इति कथ्यत इति। अतः स्वतःफलतो वानर्थाननुबंधित्वरूपप्राशस्त्यबोधनेनार्थवादा विधिशक्ति
मुत्तंभयंति। क उत्तंभः स्वतःफलवतो वानर्थाननुबंधित्वशंकाया प्रवृत्तिप्रतिबंधिकाया विगमः। इय
मेव च विधेः प्रवृत्तिजनने साहाय्यमर्थवादैः क्रियत इति विधिरर्थवादसाकांक्षः। एवमर्थवादा अ
प्यभिधया या गौण्या वा वृत्त्याभूतमर्थं वदंतोपि स्वाध्यायविध्यापादितप्रयोजनवत्त्वलाभाय वि
धिसाकांक्षाः। सोयं नष्टाश्वदग्धरथवत्संप्रयोगः। यथैकस्य दग्धस्य रथस्य जीवद्भिरश्वैरन्य
स्याविद्यमानस्याविद्यमानाश्वस्य संप्रयोगः। परस्परस्यार्थचलाय तथार्थवादानां प्रयोजनां २
शो विधिना पूर्यते विधेश्च शाब्दभावनाया इति कर्तव्यतांशोर्थवादैरिति तदिदमुभयोश्च वपो
पूर्वमेव वाक्यं। एकस्य प्रवेपात् अन्यस्य कल्पनया पूरणीयं। यथा वसंताय कपिंजलानालभत इ
ति विधावर्थवादांशोश्रुतोपि कल्प्यते। प्रतितिष्ठंति ह वा य एता रात्रीरुपयंतीत्याद्यर्थवादे वि
ध्यंत्राः। तथा च सूत्रं। विधिना त्वेकवाक्यत्वात्। स्तुत्यर्थेन विधीनां स्युरिति। विधिना
स्तुति साकांक्षेण प्रयोजनसाकांक्षाणामर्थवादानामेकवाक्यत्वाद्विधीनां विधेयानां
स्तुत्यर्थेन स्तुतिप्रयोजनेन स्तुतिरूपेणापेक्षणीकेनार्थेन वानर्थक्याभावादर्थवादा ध १७

३

33

वि
शा

मेंप्रमाणानिस्युरितिसस्यार्थः।ननुयएवलौकिकाःशब्दास्तएववैदिकास्तएवचामीषामर्थाइति
न्यायाद्विधिशब्दस्यलौकेयत्रशक्तिर्गृहीतावेदेपितदर्थकेनैवतेनभवितव्यं।लोकेचप्रेषणापु
रुषधर्मवाचित्वंक्लृप्तमितिवेदेशब्दभावनावाचित्वंकथमुपपद्यते।उच्यते।लोकवेदयोरैक्य
रूपमेव।तथाहिलोकेप्रेषणादिकंनतेनतेनरूपेणाविधिपदवाच्यं।अननुगमेननानार्थत्व
प्रसंगात्।तद्वदेवभावनावाचित्वेनोपपत्तेश्च।किंतुप्रेषणाध्येषणानुज्ञास्वस्तिप्रवर्त्तनात्व
मेकंतच्छब्दव्यापारेपितुल्यमिति।तदेवलिङादिपदवाच्यंतच्चलौकिकशब्देनास्त्येव।नचै
राजादीनामेवप्रवर्त्तकत्वात्।प्रवर्त्तकव्यापारएवप्रवर्त्तना।प्रवर्त्तकत्वंचराजादेरिववेदस्याप्य
नुमवंसिद्धं॥ननुवेदेपिप्रवर्त्तनावानीश्वरःकल्प्यतांलोकेराजादिवत्।तदुक्तं।विधि
रेवतावद्गर्भइवक्षतिकुमार्याःपुंयोगमानमिति।नवेदस्यापौरुषेयत्वात्।नहिवेदस्य
कर्त्तापुरुषोलोकेवेदेवाप्रसिद्धः।नतत्कल्पनेचतज्ज्ञानप्रामाण्यापेक्षयावेदप्रामाण्येनिर
पेक्षत्वेनस्थितंस्वतःप्रामाण्यंभग्नंस्यात्।बुद्धवाक्येपिप्रामाण्यप्रसंगाच्च।ईश्वरस्यचने
समानेपिबुद्धवाक्यंनप्रमाणंवेदवाक्यंतुप्रमाणमभ्युपगमाभिक्षुकन्यायप्रसंगः।महा

मिति

जनानुभवसिद्धत्वाभावेन तत्परिग्रहापरिग्रहाभ्यामपि विशेषानुपपत्तेः। ईश्वरप्रेरणायाः लोकवेद
साधारणत्वेन लोकेपि राजादीनां प्रेरकत्वं न स्यात्। ईश्वरप्रेरणायां स्थितायामेव राजादिरप्यसा
धारणतया प्रेरक इति चेत् तर्हि तस्यां तिष्ठतु न वा किं विहाप्यसाधारणः प्रेरको वेद एव राजादिरच्छा
नीय इत्यागतं मार्गे। ईश्वरप्रेरणायाः साधारण्या असाधारणप्रेरणासहकारणेव प्रवर्त्तक
त्वात्। किंच ईश्वरप्रेरणायां सर्वोपि विहितं कुर्यादेव न तु कश्चिदपि लंघयेत्। निषिद्धपीश्वरप्रे म
रणास्त्येवान्यथा न कोपि तत्र प्रवर्त्तेतेति तदापि विहितं स्यात्। तथा चोक्तं। अज्ञो जंतुनरीशोय
मात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा। तस्माद्राजादिरिव वेदोपि स्व
प्रवर्त्तनां सापयन्निच्छोपहारमुखेन प्रवर्त्तयतीति सिद्धं लोकवेदयोरेकरूप्यं। पूर्वमिमांस
कानां स्वतंत्रो वेदो। ब्रह्ममिमांसकानां तु ब्रह्मविवर्त्तस्तत्परतंत्रो वेद इति। यद्यपि विशेषस्तथा
पिश्वासिततुल्यत्वेन वेदस्यापौरुषेयत्वमुभयेषामपि समानं। अत्र च प्रवृत्त्यनुकूलव्यापा
रत्वं प्रवर्त्तनात्वं। स खंडोऽखंडो वोपाधिस्तस्मिन्विधिपदशक्यपि न दाश्रयविशेषापरिच्छि
तिर्गवादितुल्येव। अनुकूलव्यापारत्वं वा शक्यं प्रवर्त्तनात्वाख्यातत्वेन शक्यं तरलभ्य १८

35

एव। दंडीत्यत्र संबाधिनि मत्वर्थे प्रकृत्यर्थः दडंज्ञावत्। फलसाधनताबोध एव प्रेरणात्वमेवं कुर्वन्प्रेरको विधिरतः फलसाधनत्वैव प्रेरणात्वेन विधिपदशक्येति मंडनाचार्याः। फलसाधनाचार्थभावनान्वयलभ्येत्युक्तं प्राक्। इममेव च पक्षं पार्थसारथिप्रभृतयः मंडिताः प्रतिपन्नाः॥ औपनिषदानामपि केषांचिदिष्टसाधनतावेदोऽनेनैव मतेनोपपादनीयः। इष्टसाधनत्वे स्वरूपेपोव लिंङादिपदशक्यं न प्रेरणात्वेनेति तार्किकाः। तन्न गोरवादन्यलभ्यत्वादन्वयायोग्यत्वाच्च। इच्छाविषयसाधनत्वापेक्षया प्रवर्तनात्वमतिलघु। इच्छातद्विषययोरप्रवेशात्। इच्छाज्ञानस्यापि प्रवृत्तिज्ञानवत्। प्रवृत्तिहेतुत्वापातात्। वस्तुगत्या य इच्छाविषयस्तत्साधनमिति शब्देन प्रतिपादयितुमशक्यत्वात्। साधनत्वमात्रस्यैव शक्यत्वेऽन्विते नैव प्रत्ययेनोपस्थापितया प्रवृत्त्या सह श्रुसातदन्वयसंभवे पदांतरोपस्थापितस्वर्गेण सह वाक्येन तदन्वयासंभवात्। प्रवर्तनात्व एव पर्यवसानश्रुत्या वाक्यस्य बाधात्। प्रत्ययश्रुतेः पदश्रुतितोऽपि बलीयस्त्वेन पशुना यजेतेत्यत्र प्रकृत्यर्थपशुं विहाय प्रत्ययार्थेन करणेन सहैवैकत्वस्यान्वयादेकं करणं पशुरिति वचनव्यक्त्या कृत्वंगत्वमेकत्वस्याश्रिता किमु वक्तव्यं पदांतरसमभिव्याहाररूपाद्वाक्याद्बलीयस्त्वमिति वाक्या

र्थान्वयत्वरूपत्वाच्च। नेष्टसाधनत्वं पदार्थः। तथा हि। प्रवर्त्तनाकर्मफलतत्पुरुषप्रवृत्तिरूपार्थभावनाकिंके
नकथमितिस्वंशत्रयवती विधिनालभ्यत्वेन प्रतिपाद्यत इत्युक्तं प्राक्। अपुरुषार्थकामियांको चतस्या
प्रवर्त्तनानुपपत्तेरेकपदोपस्थापितमप्यपुरुषार्थं विहाय भिन्नपदोपात्तमन्यविशेषणमपिकमि
पदसंबंधेन साध्यतान्वययोग्यं स्वर्गमिव पुरुषार्थं स्वाभाव्यतया लंबते स्वर्गकामयते स्वर्गकाम इ
त तिकर्मण्यपि द्वितीयायाः अंतर्भूतत्वात्। यजतेकेरकर्मत्वेन स्वर्गमित्युक्तेनन्वयाच्च। अत एव यत्र क
र्मिपदं न श्रूयते तत्रापि तत्कल्प्यते। यथा प्रतितिष्ठंति ह वा य एता रात्रीरूपयंतीत्यादौ प्रतिष्ठाकामा रा
त्रिसत्रमुपेयुरित्यादि। एवं च लब्धभाव्यायां तस्यां समानपदोपस्थापितो धात्वर्थ एव करणत्यान्वे
ति। भाव्यांशस्य कर्मविषयेणावरुद्धत्वात्। सुबिभक्तियोग्ये धात्वर्थनामधेये ऽग्निष्टोमादौ तृती
याश्रवणात्। यत्रापि नामधेये द्वितीया श्रूयते तत्रापि व्यत्ययानुशासनेन तृतीयाकल्पनात्। तदुक्तं
महाभाष्यकारैः। अग्निहोत्रं जुहोतीति तृतीयार्थे द्वितीयेति। अत एव तैः प्रकृतिप्रत्यययोः प्रत्ययार्थं
सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येन प्रकृत्यर्थो गुणत्वेनेति प्रत्ययार्थभावनां प्रति धात्वर्थस्य गुणत्वे
न करणत्वमुक्तं॥ आख्यातं क्रियाप्रधानमिति वदद्भिर्निरुक्तकारैरप्येतदेवोक्तं। भावार्थाधि

करणेन्व तथैव स्थितं तेन सर्वत्र प्रत्ययार्थं प्रति धात्वर्थस्य करणत्वेनैवान्वयनियमः। अत एव गुणविशिष्टधात्वर्थविधौ धात्वर्थानुवादेन केवलगुणविधौ च मत्वर्थलक्षणाविधेर्विप्रकृष्टविषयत्वं च। यथा सोमेन यजेतेति विशिशिष्टविधौ सोमवता यागेनेति। दध्ना जुहोतीति गुणविधौ दधिमता होमेनेति नामधेयान्वयतु सामानाधिकरण्योपपत्तेर्धात्वर्थमात्रविधानाच्च न मत्वर्थलक्षणा न वा विधिविप्रकर्षः। तदेवं ज्योतिष्टोमेन यजेत स्वर्गकाम इत्यत्राख्यातार्थो भावयेदिति किमित्याकांक्षायां कमिविषयं स्वर्गमिति विधिश्रुतेर्बलीयस्त्वादाकांक्षाया उत्कटत्वाच्च। तथा च स्थितं षष्ठाद्ये। ततः केनेत्यपेक्षिते यागेनेति तृतीयान्तपदसमानाधिकरणत्वात्करणत्वेनैवान्वयनियमाच्च। किं नाम्नेत्यपेक्षिते ज्योतिष्टोमेनेति तन्नाम्नेत्यर्थः। शब्दानुपस्थितोऽपि ज्योतिष्टोमशब्दो भासत एव शाब्दबोधे श्रवणेनोपस्थापितत्वात्पर्यवसानात्। नामधेयान्वयश्च न विप्रकृष्यर्थो द्वारं न त्रिवाच्यर्थोऽन्वय इव। तेन न मत्वर्थलक्षणामन्तरेणैव ज्योतिष्टोमशब्दवतेत्यन्वयलाभः। तथा च कविप्रयोगः। हिमालयो नाम नगाधिराज इति हिमालयनामवानित्यर्थः। एवमिह प्रभिन्नक   मलोदरे मधूनि मधुकरः पिबतीत्यादावगृहीतसंगतिकत्वात्। अत एव मधुकरशब्दवाच्य इत्यपि लक्षणया नान्वयः शक्यज्ञानपूर्वकत्वाल्लक्ष्यज्ञानस्य। स्वरूप

तस्तच्छब्दे भाने वाच्यवाचकसंबंधः पश्चात्कल्प्यते संसर्गनिर्वाहायेति। तदयं वाक्यार्थः। ज्योतिष्टो
मनाम्ना यागेन स्वर्गमिष्टं भावयेदिति। कथमित्यपेक्षिते श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्या
भिः सामवायिकारादुपकारकांगग्रामप्रचैनीति। विकृतौ प्रकृतिवदित्यूपबंधेन नियेयुथा
स्मृ शक्त्यूपबंधेन मुख्यालाभे प्रतिनिधायापीति यावन्न्यायलभ्यं तत्पूरणं। एवं च यागस्य स्वर्गवि
च्छिन्नभावनाकरणत्वेन स्वर्गकरणत्वेन च साकांक्षात्कर्तव्यव्यापारविषयत्वस्वरूपं प्रवृत्तिसाध्यत्वं श्रुत्या
र्थाभ्यां लभ्यत इति तदुभयमपि न लिङादिपदवाच्यं। अप्राप्ते शास्त्रमर्थवदिति न्यायात्। अन्वयाच्च।
इष्टसाधनमिति समासे गुणभूतमिष्टपदं स्वर्गकाम इति समासांतरगुणभूतेन स्वर्गपदेन कथमन्वि
र यादिष्टस्वर्गसाधनमिति। न हि राजपुरुषवीरपुत्र इत्यत्र वीरपदराजपदयोरन्वयोस्ति पदार्थः पदा
र्थेनान्वेति न तु पदार्थैकदेशेनेति न्यायात्। करणविभक्त्या तज्ज्योतिष्टोमादिनामधेयानन्वयप्रसं
गादिदोषाश्चास्मिन्पक्षे द्रष्टव्याः। एतेनेष्टसाधनत्वमनिष्टासाधनत्वं प्रवृत्तिसाध्यत्वमिति त्रयमपि वि
ध्यर्थ इत्यपि न भावनाकरणत्वेना) पास्तं। अतिगौरवादर्थवादानां सर्वथा वैयर्थ्यापत्तेश्च। अत एव
त्न प्रवृत्तिसाध्यत्वमात्रं विध्यर्थ इत्यपि न भावनाकरणत्वेनार्थलभ्य भ्यत्वादित्युक्ते। अलौकिको नियो
गस्त्वलौकिकत्वादेव न विध्यर्थः। पराक्रांतं वाचस्पतिमिश्रैः तस्मादनन्यलभ्याल्लघुभूता च प्रेरणे २०

३९

वलिङ्गादिपदवाच्येति स्थितं। प्रवर्त्तकं तु ज्ञानं वाक्यार्थमर्यादालभ्यमन्यदेव सर्वेषामपि वादिनां आख्यातार्थ एव न च विज्ञेयष्यतया भासते न धात्वर्थो न नामार्थः स्वर्गकामो वेति चोक्तप्रायमेव। तेन च यागानुकूलकृतिमान् स्वर्गकाम इति तार्किकमतं पुरुषविशेष्यकवाक्यार्थज्ञानमपास्तं। संक्षेपेण मतं भाट्टमिदमत्रोपपादितं। यदुक्तमिहान्यत्र तदनुसंधेयमाकरात्॥१८॥

व्य

इदानीं ज्ञानज्ञेयज्ञातृरूपस्य करणकर्मकर्तृरूपस्य च त्रिकद्वयस्य त्रिगुणात्मकत्वं वक्तव्यमिति तदुभयं संक्षिप्य त्रिगुणात्मकत्वं प्रतिजानीते॥

॥ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः॥ प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि॥॥१९॥

॥ज्ञानं प्राग्व्याख्यातं। ज्ञेयमप्यत्रैवान्तर्भूतं ज्ञानोपाधित्वात् ज्ञातृत्वस्य कर्म क्रिया त्रिविधः कर्मसंग्रह इत्यत्रोक्ता चकारात्करणकर्मकारकयोरत्रैवान्तर्भावः क्रियोपाधिकत्वात्। कारकत्वस्या कर्ता क्रियायाः निवर्तकः। चकारात् ज्ञाता च। कर्तुः क्रियोपाधिकत्वेपि पृथक्। त्रैगुण्यकथनं। कुतार्किकभ्रमकल्पितात्मत्वनिवारणार्थं न हि कर्तैवात्मेति मन्यते गुणाः सत्वरजस्तमांसि। सम्यक्कार्यभेदेन ख्यायन्ते प्रतिपाद्यन्तेऽस्मिन्निति गुणसंख्यानं कापिलं तस्मिन् ज्ञानं क्रिया च कर्ता च गुणभेदतः सत्वरजस्तमोभेदेन त्रिधैव प्रोच्यते। एवकारो विधान्तरनिवारणार्थः। यद्यपि कापिलं शास्त्रं परमार्थब्रह्मैकत्वविषये न प्रमाणं तथाप्यपरमार्थगुणगौणभेदनिरूपणे व्याव

रु ३

२१ हारिकं प्रामाण्यं न जनत इति वक्ष्यमाणार्थस्य स्पष्टं गुणसंख्याने प्रोच्यत इत्युक्तं। तत्रांतरे प्रसिद्धमिदं न
केवलमस्मिन्नेव तंत्र इति सूचिताः। यथावद्यथाशास्त्रं शृणु श्रोतुं सावधानो भव। तानि ज्ञानादीनि।
अपि ज्ञानादीन्येकदजातानि त्रिगुणभेदकृतानि। अत्रैवमपौनरुक्त्यं द्रष्टव्यं। चतुर्दशेध्याये तत्र सत्त्वं
निर्मलत्वादिसादिना गुणानां बंधहेतुत्वप्रकारो निरूपितो गुणातीतस्य जीवन्मुक्तत्वनिरूपणाय
सप्तदशे पुनर्यजंते सात्त्विका देवानित्यादिना गुणकृतत्रिविधस्वभावनिरूपणेनासुरं रजस्तमः
स्वभावं परित्यज्य सात्त्विकाहारादिसेवया दैवः सात्त्विकः स्वभावः संपादनीय इत्युक्तं। इह तु स्वभा
वतो गुणातीतस्यात्मनः क्रियाकारकफलसंबंधो नास्तीति दर्शयितुं तेषां सर्वेषां त्रिगुणात्मकत्वमे
वरूपांतरमस्ति। येनात्मसंबंधिता स्यादित्युच्यत इति विशेषः॥१९॥ एवं ज्ञानस्य कर्मणः कर्तु
श्च प्रत्येकं त्रैविध्यं ज्ञातव्यत्वेन प्रतिज्ञाने प्रथमं ज्ञानं त्रैविध्यं निरूपयति त्रिभिः श्लोकैः॥ तत्राद्वैत
वादिनां सात्त्विकं ज्ञानमाह॥ ॥सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तत्
ज्ञानं विद्धि सात्त्विकं॥२०॥ ॥ सर्वेषु भूतेषु अव्याकृतहिरण्यगर्भविराडादिषु बीजसूक्ष्मस्थू
लरूपेषु समष्टिव्यष्ट्यात्मकेषु सर्वेष्वपि येनैव निर्वाहभूतेष्वपि येनेन भावनधर्मकत्वमुच्यते॥ २१

तेनोत्पत्तिविनाशशीलेषु दृश्यवर्गेषु विभक्तेषु परस्परव्यावृत्तेषु नानारसेषु अव्ययमुत्पत्तिविनाशादिसर्वविक्रियाशून्यमदृश्यमविभक्तमव्यावृत्तं सर्वत्रानुस्यूतमधिष्ठानतया बाधावधितया च एकमद्वितीयं भावं परमार्थ्यसत्तारूपं स्वप्रकाशानंदमात्मानं येनांतःकरणपरिणामभेदेन वेदांतवाक्यविचारपरिनिष्पन्नेनेक्षते साक्षात्करोति। तस्मिन्मिथ्याप्रपंचबाधकमद्वैतात्मदर्शनं सात्विकं सर्वसंसारोच्छित्तिकारणं ज्ञानं विद्धि। द्वैतदर्शनं तु राजसं तामसं च संसारकारणं न सात्विकमित्यभिप्रायः॥२०॥ ॥पृथक्त्वेन तु यत्ज्ञानं नानाभावान्पृथग्विधान्॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं॥२१॥ तुशब्दः प्रागुक्तसात्विकव्यतिरेकप्रदर्शनार्थः। पृथक्त्वेन भेदेन स्थितेषु सर्वभूतेषु देहादिषु नानाभावान्प्रतिदेहमन्यानात्मनः पृथग्विधान्सुखदुःखित्वादिरूपेण परस्परविलक्षणान् येन ज्ञानेन वेत्तीति वक्तव्ये यज्ज्ञानं वेत्तीति करणे कर्तृत्वोपचारादेधांसि पचतीतिवत्। कर्तुरहंकारस्य तद्दृसभेदाद्वा। तज्ज्ञानं विद्धि राजसमिति पुनर्ज्ञानपदमात्मभेदज्ञानमनात्मभेदज्ञानं च परामृशति। तेनात्मनां परस्परं भेदस्तेषामीश्वराद्भेदस्तेभ्य ईश्वरादन्योन्यतश्चाचेतनवर्गस्य भेद इत्यनात्मोपाधिकभेदपंचकज्ञानं कुतार्किकाणां राजसमेवेत्यभिप्राय॥२१॥

अ० १८

॥यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहेतुकं॥अतत्वार्थवदल्पंचतत्तामसमुदाहृतं॥२२॥ ॥तुशब्दो
राजसाद्भिन्नत्तिः॥ बहुषुप्रकृतकार्येषुविद्यमानेषुएकस्मिन्कार्येप्रकृतविकारेदेहप्रतिमादौवा
अहेतुकंहेतुरुपपत्तिस्तद्रहितं।अन्येषांप्राकृतकार्याणामात्मत्वाभावेकथमेकस्यतादृशस्या
त्मत्वमित्यनुसंधानशून्यंकृत्स्नवत्परिपूर्णवत्सक्तं।एतावानेवात्माईश्वरोवानातःपरमस्ती
त्यभिनिवेशान्वितं।यथादिगंबराणांसावयवोदेहपरिमाणआत्मेति।यथाचार्वाकाणांदेह
एवात्मेति।एवंपाषाणदार्वादिमात्रईश्वरइत्येकस्मिन्कार्येसक्तमहेतुकत्वादेवातत्वार्थवत्।नत
त्वार्थावलंबनं।अल्पंचनित्यत्वविभुत्वाग्रहात्।ईदृशंनित्यविभुदेहातिरिक्तात्मव्यतिरि
क्तेश्वरग्राहिताकिंकिज्ञानविलक्षणमनित्यपरिच्छिन्नदेहाद्यात्माभिमानरूपंचार्वाकादी
नांयज्ज्ञानंतत्तामसमुदाहृतं।तामसानांप्राकृतजनानामीदृशज्ञानदर्शिभिः॥२२॥ तदे
वमौपनिषदानामद्वैतात्मदर्शनंसात्विकमुपादेयंमुमुक्षुभिः।द्वैतदर्शिनांतुनित्यविभुपरस्पर
विभिन्नात्मदर्शनंराजसं।अनित्यपरिच्छिन्नात्मदर्शनंचतामसंहेयमुक्तं।संप्रतित्रिविधंकर्मो
च्यते॥ ॥नियतंसंगरहितमरागद्वेषतःकृतं।अफलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते
॥२३॥

२२

43

नियतंयावदंगोपसंहारासमर्थानामपि फलावश्यंभावव्याप्तनित्यमितियावत्। संगोहमेवयाज्ञि
करसाध्यमिमानरूपोहंकारायरपर्याराजसोगर्वविशेषः तेनशून्यंसंगरहितंयावदज्ञानंतुकर्तृत्व
भोक्तृत्वप्रवर्त्तनोहंकारोनुवर्त्ततएवसात्विकस्यापितद्रहितस्यतुतत्वविदोनकर्माधिकारइत्युक्तम
सकृत्। रागोराजसन्मानादिकमनेनलप्स्यइत्यभिप्रायः। द्वेषःशत्रुमनेनपराजेष्यइत्यभिप्रायः
ताभ्यांनकृतमरागद्वेषतःकृतं। अफलप्रेप्सुनाफलाभिलाषरहितेनकर्त्रायत्कृतंकर्मयागदान
मोहादितत्सात्विकमुच्यते॥२३॥ ॥यत्तुकामेप्सुनाकर्मसाहंकारेणवापुनः॥ क्रियतेबहुलाया
संतद्राजसमुदाहृतं॥२४॥ तुःसात्विकाद्भिन्नतिकामेप्सुनाफलकामेननर्मीसाहंकारेणप्रागुक्ते
संगात्मकगर्वयुक्तेनचवाशब्दसमुच्चये। पुनरितिनियतंयावत्कामनंकाम्यावृतेः। बहुलायासंस
र्वांगोपसंहारेणक्लेशावहंयत्काम्यंकर्मक्रियतेतद्राजसमुदाहृतं। अत्रसर्वैर्विशेषणैःसात्विकस
र्वविशेषणव्यतिरेकोदर्शितः॥२४॥ ॥अनुबंधंक्षयंहिंसामनपेक्ष्यचपौरुषं॥ मोहादारभ्य
तेकर्मयत्तत्तामसमुच्यते॥२५॥ ॥अनुबंधंपश्चाद्भाव्यशुभं। क्षयंशरीरसामर्थ्यस्यधनस्य
सेनायाश्चनाशं। हिंसांप्राणिपीडांपौरुषंआत्मसामर्थ्यंचअनपेक्ष्यअपर्यालोच्यमोहात्केवला

अ०१८

विवेकादेवारभ्यते यत्कर्म। यथा दुर्योधनेन युद्धं तत्तामसमुच्यते॥२५॥ इदानीं त्रिविधकर्तोच्यते॥ मुक्तसंगो नहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्तासात्विक उच्यते॥२६॥ मुक्तसंगस्त्यक्तफलाभिसंधिः। अनहंवादी कर्ताहमिति वदनशीलो न भवति। स्वगुणश्लाघाविहीनो वा। धृतिर्विघ्नाद्युपस्थितावपि प्रारब्धापरित्यागहेतुरंतःकरणवृत्तिविशेषो धैर्यं। उत्साहः इदमहं करिष्याम्येवेति निश्चयात्मिका बुद्धिर्धृतिहेतुभूता ताभ्यां संयुक्तः। धृत्युत्साहसमन्वितः कर्मणः क्रियमाणस्य सिद्धावसिद्धौ च हर्षशोकाभ्यां हेतुभ्यां यो विकारो वदनविकासम्लानत्वादिस्तेन रहितः सिद्ध्यसिद्ध्योर्निर्विकारः। केवलं शास्त्रप्रमाणप्रयुक्तो न फलरागेण। अतएवंभूतः कर्त्तासात्विक उच्यते॥२६॥ ॥रागीकर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्त्ता राजसः परिकीर्तितः॥२७॥ ॥रागी कामाद्याकुलचित्तः अतएव कर्मफलप्रेप्सुः कर्मफलार्थी। लुब्धः परद्रव्याभिलाषी धर्मार्थं स्वद्रव्यत्यागासमर्थश्च। स्वाभिप्रायप्रकटनेन परवृत्तिच्छेदनं हिंसा तदात्मकस्तत्स्वभावः। स्वाभिप्रायाप्रकटनेन तु नैकृति इति भेदः। अशुचिः शास्त्रोक्तशौचहीनः। सिद्ध्यसिद्ध्योः कर्मफलस्य हर्षशोकान्वितः कर्त्ता राजसः परिकीर्तितः॥२७॥ ॥अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते॥२८॥

२३

45

अयुक्तः सर्वदा विषयापहृतचित्तत्वेन कर्त्तव्येष्वनविहितः। प्राकृतः शास्त्रसंस्कृतबुद्धिवैकल्यस्य च। स्तब्धो गुरुदेवतादिष्वप्यनम्रः। शठः परवंचनार्थमन्यथा जानन्नप्यन्यथावादी। नैकृतिकः। स्वस्मिंनुपकारित्वभ्रममुत्पाद्य परवृत्तिच्छेदनेन स्वार्थपरः। अलसः अवश्यकर्त्तव्येष्वप्यप्रवृत्तिशीलः। विषादी। सततमसंतुष्टस्वभावत्वेनानुशोचनशीलः। दीर्घसूत्री निरंतरशंकासहस्रकल्पितान्तःकरणत्वेनातिमंथरप्रवृत्तिः। यदद्य कर्त्तव्यं तन्मासेनापि करोति न वेत्येवंशीलश्च कर्त्ता तामस उच्यते।२८॥ तदेवं ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदत इति व्याख्यातं। संप्रति धृत्युत्साहसमन्वित इत्यत्र सूचितयोर्बुद्धिधृत्योस्त्रैविध्यं प्रतिजानीते॥ ॥बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु। प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥२९॥ ॥बुद्धेरध्यवसायावृत्तिमत्याः धृतेश्च तद्वृत्तेः सत्वादिगुणतस्त्रिविधमेव भेदं मया त्वां प्रति सत्काल्येन परमाप्तेन प्रोच्यमानमशेषेण निरवशेषेण पृथक्त्वेन हेयादेयविवेकेन शृणु श्रोतुं सावधानो भव। हे धनंजय इति दिग्विजयप्रसिद्धं महिमानं सूचयन् प्रोत्साहयति। अत्रेदं विंसते। किमत्र बुद्धिशब्देन वृत्तिमात्रमभिप्रेतं किं वा वृत्तिमदंतःकरणं। प्रथमे ज्ञानं पृथङ् न वक्तव्यं। द्वितीये कर्त्ता पृथङ् न वक्तव्यः। वृत्तिमदंतःकरणस्यैव कर्त्तृत्वात्। ज्ञानधृत्योः पृथक्त्वेन

गी०१८ वैयर्थ्यं च। न चेच्छादिपरिसंख्यार्थं तत्। वृत्तिमदंतःकरणत्रैविध्यकथनेन सर्वासामपि तद्वृत्तीनां त्रैविध्यस्य
विवक्षितत्वात्। उच्यते। अंतःकरणोपहितश्चिदाभासः कर्ता। इह तूपहितान्निष्कृष्य उपाधिमात्रं करण
त्वेन विवक्षितं। सर्वत्र करणोपहितस्य कर्तृत्वात्। यद्यपि च कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा
धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति श्रुत्यनूदितानां सर्वासामपि वृत्तीनां त्रैविध्यं विवक्षि
तं। तथापि धीधृत्योस्त्रैविध्यं पृथगुक्तं। ज्ञानशक्तिक्रियाशक्त्युपलक्षणार्थं न तु परिसंख्यार्थमिति
रहस्यं॥२९॥ न च बुद्धेस्त्रैविध्यमाह त्रिभिः॥ ॥प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये। बंधं
मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी॥३०॥ प्रवृत्तिं कर्ममार्गं। निवृत्तिं संन्यासमार्गं। कार्ये प्रवृ
त्तिमार्गे कर्मणां करणं। अकार्ये निवृत्तिमार्गे कर्मणामकरणं। भयं प्रवृत्तिमार्गे गर्भवासादिदुः
खं। अभयं निवृत्तिमार्गे तदभावं। बंधं प्रवृत्तिमार्गे मिथ्याज्ञानकृतकर्तृत्वाद्यभिमानं मोक्षं निवृत्ति
मार्गे तत्त्वज्ञानकृततज्ज्ञानतत्कार्याभावं च या वेत्ति करणाकर्तृत्वोपचारात्। यया वेत्ति कर्त्री बुद्धिः सा प्रमा
णजनितनिश्चयवती हे पार्थ सात्त्विकी। बंधमोक्षयोरेतत्कीर्तनात्तद्विषयमेव प्रवृत्त्यादि व्याख्या
तं॥३०॥ ॥यया धर्ममधर्मं च कार्यं चाकार्यमेव च। अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी २८
॥३१॥ धर्मं शास्त्रविहितं अधर्मं शास्त्रप्रतिषिद्धं अदृष्टार्थमुभयं। कार्यं च अकार्यं च दृष्टार्थमु

नयं।अयथावदेवप्रजानातियथावन्नजानाति।किंस्विदिदमित्थंनवेतिचानध्यवसायंसंशयंवाऽज्ञ
नेययाबुध्यासाराजसीबुद्धिः।अत्रतृतीयानिर्देशादन्यत्रापिकरणत्वेव्याख्येयं॥३१॥ ॥अधर्मंध
र्ममितियामन्यतेतमसावृत्ता।सर्वार्थान्विपरीतांश्चबुद्धिःसापार्थतामसी॥३२॥तमसाविशेषद
र्शनविरोधिनादोषेणावृताबुद्धिरधर्मंधर्ममितिमन्यते।अदृष्टार्थेसर्वत्रविपर्यस्यति।तथास
र्वार्थान्दृष्टप्रयोजनानपिज्ञेयपदार्थान्विपरीतानेवमन्यते।साविपर्ययवर्तीबुद्धिःस्तामसी
॥३२॥इदानींधृतेस्त्रैविध्यमाहत्रिभिः॥ ॥धृत्याययाधारयतेमनःप्राणेंद्रियक्रियाः॥योगेना
व्यभिचारिण्याधृतिःसापार्थसात्विकी॥३३॥योगेनसमाधिनाऽव्यभिचारिण्याऽविनाभूतय
थासमाधिव्याप्तयाययाधृत्याप्रयत्नेनमनसःप्राणेंद्रियाणांचक्रियांचेष्टाधारयतेउच्छास्त्रप
वृत्तेर्निरुणद्धि।यस्यांसत्यामवश्यंसमाधिर्भवति।ययाचधार्यमाणामनआदिक्रियाःशास्त्र
मतिक्रम्यनार्थांतरमवगाहंतेधृतिःसापार्थसात्विकी॥३३॥ ॥ययातुधर्मकामार्थान्धृत्या
धारयतेऽर्जुन।प्रसंगेनफलाकांक्षीधृतिःसापार्थराजसी॥३४॥तुःसात्विक्याःभिनत्ति।प्रसं
गेनकर्तृत्वाभिनिवेशेनफलाकांक्षीसन्यथायाधृत्याधर्मकाममर्थंचधारयते।नित्यकर्तव्यतया
वधारयति।नतुमोक्षंकदाचिदपिधृतिःसापार्थराजसी॥३४॥ ॥ययास्वप्नंभयंशोकंविषा

अ०१८

दंमदमेवच। नविमुंचतिदुर्मेधाधृतिःसापार्थतामसी॥३४॥स्वप्नंनिद्राभयंशोकंत्रासं।शोकंइष्ट
वियोगनिमित्तंसंतापंविषादमिंद्रियावसादं॥मदंमशास्त्रीयविषयसेवोन्मुखत्वंच।ययानवि
मुंचत्येवकिंतुसदैवकर्त्तव्यतयामन्यतेदुर्मेधाविवेकासमर्थःधृतिःसापार्थतामसी॥३६॥
एवंक्रियाणांकारणं।गुणतस्त्रैविध्यमुक्त्वातत्फलस्यसुखस्यत्रैविध्यंप्रतिजानीतेश्लोकार्द्धेन
सुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ॥मेममवचनात्शृणु।हेयादेयविवेकार्थंव्यासंगांतर
निवारणेनमनःस्थिरीकुरुहेभरतर्षभेतियोग्यतादर्शिता।सात्विकंसुखमाहसार्द्धेन॥
अभ्यासाद्रमतेयत्रदुःखांतंचनिगच्छति॥३७॥ ॥यत्रसमाधिसुखेअभ्यासादतिपरिचया
द्रमतेपरितोषोभवतिनतुविषयसुखइवसद्यएव।यस्मिन्रममाणश्चदुःखस्यसर्वस्याप्यंत
मवसानंनितरांगच्छति।नतुविषयसुखवद्वांतेमहद्दुःखं॥३७॥तदेवविवृणोति॥यत्तदग्रेवि
षमिवपरिणामेऽमृतोपमं।तत्सुखंसात्विकंप्रोक्तमात्मबुद्धिप्रसादजं॥३८॥यत्तदग्रेज्ञानवैराग्य
ध्यानसमाध्यारंभेऽत्यंतायासनिर्वाहत्वाद्विषमिवद्वेषविशेषावहंभवति।परिणामेज्ञानवैराग्या
दिपरिपाकेत्वमृतोपमंप्रीत्यतिशयास्पदंभवति।आत्मविषयाबुद्धिरात्मबुद्धिस्तस्याःप्रसा
दोनिद्रालस्यादिराहित्येनस्वच्छतयास्वच्छानंततोजातमात्मबुद्धिप्रसादजं॥नतुराजस

२८

49

मिवविषयेंद्रियसंयोगजंनवातामसमिवनिद्रालस्यादिजं॥ईदृशंयदनात्मबुद्धिनिरस्यात्मबुद्धि
प्रसादजंसमाधिसुखंन।तत्सात्विकंप्रोक्तंयोगिभिः।अपरआह।अभ्यासादावृत्तेर्यत्ररमतेप्रीय
तेयत्रचदुःखावसानंप्राप्नोतितत्सुखंतच्चत्रिविधंऽगुणभेदेनश्रृण्वितिनसपाध्याहारेण
पूर्वस्यश्लोकस्यान्वयः॥यत्तदग्रेइत्यादिश्लोकेनतुसात्विकसुखलक्षणमिति।भाष्यकाराभिप्रा
याप्येवं॥३८॥ ॥विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं॥परिणामेविषमिवतत्सुखंराजसंस्मृ
तं॥३९॥ ॥विषयाणांद्रियाणांचसंयोगाऽज्जातंनवात्मबुद्धिप्रसादात्।यदपिप्रसिद्धंस्रक्चंद
नवनितासंगादिसुखंअग्रेप्रथमारंभेमनःसंयमादिक्लेशाभावादमृतोपमं।परिणामेत्वै
हिकपारत्रिकदुःखावहत्वात्विषमिवतत्सुखंराजसंस्मृतं॥३९॥यदग्रेचानुबंधेचसुखं
मोहनमात्मनः।निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतं॥४०॥यदग्रेप्रथमारंभेच।अनुबंधे
परिणामेचयत्सुखमात्मनोमोहकरं।निद्रालस्यप्रसिद्धे।प्रमादःकर्त्तव्यार्थाविधानमंतरेण
मनोराज्यमात्रं।तेभ्यएवोतिष्ठतिनतुसात्विकमिवबुद्धिप्रसादजंनवाराजसमिवविषये
द्रियसंयोगजंतंनिद्रालस्यप्रमादोत्थंतामसंसुखउदाहृतं॥४०॥इदानीमनुक्तमपिसंग्र

50

उ५०१८

त्स्नं नु प्रकरणार्थमुपसंहरति भगवान्॥ ॥न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्वं प्रकृतिजैर्मुक्तं यदेभिस्यात्त्रिभिर्गुणैः॥४०॥ ॥सत्वरजस्तमसां साम्यावस्छा प्रकृतिः॥ ततो जातैः वैषम्यावस्छां प्राप्तैः प्रकृतिजैर्न तु साक्षाद्गुणानां प्रकृतिजत्वमस्ति तद्रूपत्वात्। तस्माद्वैषम्यावस्छेव तदुत्पत्तिरूपचारात्॥ अथवा प्रकृतिर्माया तत्प्रभवैस्तत्कल्पितैः प्रकृतिजैरेभिस्त्रिभिर्गुणैर्बंधनहेतुभिः सत्वादिभिर्मुक्तं हीनं सत्वं प्राणिजातमप्राणि वा यत्स्यात्तत्पुनः पृथिव्यां मनुष्यादिषु दिवि देवेषु वा नास्ति क्वापि गुणत्रयरहितमनात्मवस्तु नास्तीत्यर्थः॥४०॥ ॥तदेवं सत्वरजस्तमोगुणात्मकः क्रियाकारकफललक्षणः सर्वः संसारो मिथ्याज्ञानकल्पितोनर्थश्च तु दशाध्य्यां उपसंहृतः। पंचदशे च वृक्षरूपककल्पनया तमुक्त्वा अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा॥ ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः॥ इत्यसंगशस्त्रेण विषयवैराग्येण तस्य छेदनं कृत्वा परमात्मा चेष्टव्य इत्युक्तं। तत्र सर्वस्य त्रिगुणात्मकत्वे त्रिगुणात्मकस्य संसारवृक्षस्य कथं छेदो असंगशस्त्रस्यैवानुपपत्तेरित्याशंकायां स्वस्वाधिकारविहितैर्वर्णाश्रमधर्मैः परितोष्यमाणात्परमेश्वरादसंगशास्त्रलाभ इति वदितुमेता

वानेव सर्ववेदार्थः परमपुरुषार्थमिच्छद्भिरनुष्ठेय इति च गीताशास्त्रार्थ उपसंहर्त्तव्य इत्येवमर्थमु
त्तरप्रकरणमारभ्यते तदेसूत्रं ॥ ॥ब्राह्मणक्षत्रियविशांशूद्राणां च परंतप। कर्माणि प्रविभक्ता
नि स्वभावप्रभवैर्गुणैः ॥४२॥ ॥त्रयाणां समाकरणं द्विजत्वेन वेदाध्ययनादितुल्यधर्मत्वकथ
नार्थं॥ शूद्राणामिति पृथक्करणमेकजातित्वेन वेदानधिकारित्वज्ञापनार्थं। तथा वशिष्ठः। चत्वा
रो वर्णाः। ब्राह्मणक्षत्रियवैश्यशूद्रास्तेषां त्रयो वर्णा द्विजातयो ब्राह्मणक्षत्रियवैश्यास्तेषां मा
तुरग्रेऽजननं द्वितीयं मौंजीबंधनं। अत्रास्य माता सावित्री पिता त्वाचार्य उच्यत इति। तथा प्रतिवि
शिष्टं चातुर्वर्ण्यं स्थानविशेषाच्च। ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य य
द्वैश्यः पद्भ्यां शूद्रो अजायतेत्यपि निगमो भवति। गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं
जगत्या वैश्यं न केनचिच्छंदसा शूद्रमित्यसंस्कारो विज्ञायत इति। शूद्रश्चतुर्थो वर्ण एकजाति
रिति च गौतमः॥ हे परंतप शत्रुतापन तेषां चतुर्णामपि वर्णानां कर्माणि प्रकर्षेण विभक्तानि
इतरेतरविभागेन व्यवस्थितानि। कैः स्वभावप्रभवैर्गुणैः। ब्राह्मण्यादिस्वभावस्य प्रभवैर्हे
तुभूतैर्गुणैः सत्वादिभिः। तथा हि। ब्राह्मणस्वभावस्य सत्वगुण एव प्रभवः प्रशांतत्वात्। क्षत्रि

अ०१८

यस्वभावस्य सत्वोपसर्जनं रजः ईश्वरभावात्। वैश्यस्वभावस्य तमउपसर्जनं रजः ईहास्वभावत्वा
त्। शूद्रस्वभावस्य रजउपसर्जनं तमः मूढस्वभावत्वात्। अथवा मायाख्या प्रकृतिः॥ स्वभावः तेन
उपादानात्प्रभवो येषां तैः। प्राग्भवीयः संस्कारो वर्त्तमानेन्नवे स्वफलाभिमुखत्वेनाभिव्यक्तः स्वभावः
सनिमित्तत्वेन प्रभवो येषामिति वा। शास्त्रस्यापि पुरुषस्वभावसापेक्षत्वाच्छास्त्रेण प्रविभक्तान्यपि
गुणैः प्रविभक्तानीत्युच्यंते। आख्यातानामर्थं बोधयतामधिकारिशक्तिः सहकारिणीति न्यायात्।
तथाहि गौतमः। द्विजातीनामध्ययनमिज्यादानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः
पूर्वेषु नियमस्तु राज्ञोधिकं रक्षणं सर्वभूतानां न्याय्यदंडत्वं वैश्यस्याधिकं कृषिवणिक्पाशुपा
ल्यं कुसीदं च। शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः। शौचमाचमनार्थे पाणिपादप्र
क्षालनमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषामिति। अत्र च साधारणा असा
धारणाश्च धर्मा उक्ताः पूर्वेषु अध्ययनेज्यादानेषु नियमः। अवश्यकर्त्तव्यत्वेन तु प्रवचनयाज
नप्रतिग्रहेषु वृत्त्यर्थत्वादित्यर्थः। कृषिर्वाणिज्यं। कुसीदं वृध्यै धनप्रयोगः। उत्तरेषामिति श्रेष्ठा
नां द्विजातीनामित्यर्थः॥ वसिष्ठोपि। षट्कर्माणि ब्राह्मणस्याध्ययनमध्यापनं यज्ञो याजनं दानं २७
प्रतिग्रहश्चेति। त्रीणि राजन्यस्याध्ययनं यज्ञो दानं च शस्त्रेण च प्रजापालनं स्वधर्मस्तेन जी

53

वेद्। एतान्येव त्रीणि वैश्यस्य कृषिवाणिज्यापाशुपाल्यं कुसीदं च। तेषां परिचर्या शूद्रस्येति। आपस्तंबो
पि। चत्वारो वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्रास्तेषां पूर्वः पूर्वो। जन्मतः श्रेयान्। स्वकर्म ब्राह्मणस्याध्य
यनमध्यापनं यज्ञो याजनं दानं प्रतिग्रहणं दायाद्यं शिलोंछोन्यच्चापरिगृहीतमेतान्येव क्षत्रि
यस्याध्यायनयाजनप्रतिग्रहणानीति परिहाप्य युद्धदंडाधिकानि। क्षत्रियवद्वैश्यस्य दंडयुद्धव
र्जनं कृषिगोरक्षवाणिज्याधिकं परिचर्या शूद्रस्येतरेषां वर्णानामिति। मनुरपि। अध्यापनमध्य
यनं यजनं याजनं तथा। दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्। प्रजानां रक्षणं दानमिज्याध्य
यनमेव च। विषयेष्वप्रसक्तिं च क्षत्रियस्य समादिशत्। पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वाणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च। एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्। एतेषामेव
वर्णानां शुश्रूषामनसूययेति। एवं चतुर्णामपि वर्णानां गुणभेदेन कर्मापि प्रविभक्तानि॥४१॥
तत्र ब्राह्मणस्य स्वाभाविकगुणकृतानि कर्माण्याह॥ ॥शमो दमस्तपः शौचं क्षांतिरार्जवमे
व च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं॥४२॥ ॥शमोंतःकरणोपरमः दमो बाह्यक
रणोपरमः प्रागुक्तः। तपः शारीरादि। देवद्विजगुरुः प्राज्ञेत्यादावुक्तं। शौचमपि बाह्याभ्यंतरभे
दन प्रागुक्तं॥ क्षांतिः क्षमा। आकृष्टस्य ताडितस्य वा मनसि विकारराहित्यं प्राग्व्याख्यातं। आ

ऊ२०१८

र्जवमकौटिल्यंप्रोक्तं।ज्ञानंसांगवेदतदर्थविषयं।विज्ञानंकर्मकांडेयज्ञादिकर्मकौशलं।ब्रह्म
कांडेब्रह्मात्मैक्यानुभवः।आस्तिक्यंसात्विकीश्रद्धा।प्रोक्ता।एतच्छमादिनवकंस्वभावजंस
त्वगुणस्वभावद्भूतं।ब्रह्मकर्मब्राह्मणजातेःकर्म।यद्यपिचतुर्णामपिवर्णानांसात्विकावस्था
यामेतेधर्माःसंभवंतितथापिबाहुल्येनब्राह्मणेभवंतिसत्वस्वभावत्वात्तस्य।सत्वोद्रेकवतो
नत्वन्यत्रापिकदाचिद्भवंतिइतिशास्त्रांतरसाधारणधर्मतयोक्ताः।तथाचविष्णुः।क्षमा
सत्यंदमःशौचंदानमिंद्रियसंयमः।अहिंसागुरुशुश्रूषातीर्थानुसरणंदया॥आर्जवंलो
भशून्यत्वंदेवब्राह्मणपूजनं।अनभ्यसूयाचतथाधर्मःसामान्यउच्यते।सामान्यश्चतुर्णाम
पिवर्णानां।तथातथोप्रायेनचतुर्णामप्याश्रमाणामित्यर्थः॥तथाबृहस्पतिः।दयाक्षमानु
सूयाचशौचानायासमंगलं।अकार्पण्यमस्पृहत्वंसर्व[illegible]साधारणानिच।परेवाबंधुवर्गे
वामित्रेद्वेष्टरिवासदा।आपन्नेरक्षितव्यंतुदयैषापरिकीर्तिता।बाह्येचाध्यात्मिकेचैवदुःखे
चोत्पादितेक्वचित्।नकुप्यतिनवाहंतिसाक्षमापरिकीर्तिता।नगुणान्गुणिनोहंतिस्तौतिमं
दगुणानपि।नान्यदोषेषुरमतेसानुसूयाप्रकीर्तिता।अभक्ष्यपरिहारश्चसंसर्गश्चाप्यनि
गुणैः।स्वधर्मेचव्यवस्थानंशौचमेतत्प्रकीर्तितं।शरीरंपीड्यतेयेननसुशुभेनापिकर्मणा।अ

त्यंतंतन्नकर्त्तव्यंमनायासःसउच्यते।प्रशस्ताचरणंनित्यमप्रशस्तविवर्जनं॥एतद्धिमंगळंप्रोक्तंमुनि
भिस्तत्वदर्शिभिः।स्तोकादपिप्रदातव्यमदीनेनांतरात्मना।अहन्यहनियत्किंचिदकार्पण्यंहितत्स्मृ
तं।यथोत्पन्नेनसंतोषःकर्त्तव्योह्यर्थवस्तुना॥परस्याचिंतयित्वार्थंसाऽस्पृहापरिकीर्त्तिता।एतए
वाष्टावात्मगुणास्तेनगोतमेनपठिताः॥अथाष्टावात्मगुणाःदयासर्वभूतेषुक्षांतिरनसूयाशौच=
मनायासोमंगळमकार्पण्यमस्पृहेति।तथामहाभारते।सत्यंदमस्तपःशौचंसंतोषोह्रीक्षमाऽर्जवं
ज्ञानंशमोदयाध्यानमेषधर्मःसनातनः।सत्यंभूतहितंप्रोक्तंमनसोदमनंदमः।तपःस्वधर्मवर्त्ति
त्वंशौचंसंकर।वर्जितं।संतोषोविषयत्यागोह्रीरकार्यनिवर्त्तनं।क्षमाद्वंदसहिष्णुत्वमार्जवंसमचि
त्तता।ज्ञानंतत्वार्थसंबोधःशमःश्चित्तप्रशांतता।दयाभूतहितैषित्वंध्यानंनिर्विषयंमनः।देवलः\
शौचंदानंतपःश्रद्धागुरुसेवाक्षमादया।विज्ञानंविनयःसत्यमितिधर्मसमुच्चयः।तथाव्रतोप
वासनियमैःशरीरोत्तापनंतपः।प्रत्ययोधर्मकार्येषुतथाश्रद्धेत्युदाहृता।नास्तिह्यश्रद्दधानस्यक
र्मकृत्यप्रयोजनं।यस्तुनवैदिकीनांचलौकिकानांचसर्वशः।धारणंसर्वविद्यानांविज्ञानमितिकी
र्त्तितं।विनयंद्विविधंप्राहुःशास्त्रदमशमाविति।शेषंव्याख्यातप्रायमितिवचनानिनलिखितानि
याज्ञवल्क्यः।इज्याचारदमाहिंसादानस्वाध्यायकर्मणां।अयंतुपरमोधर्मोयद्योगेनात्मदर्श

अ०१८ नमिति। इयंचसर्वादैवीसंपत्प्राग्व्याताब्राह्मणस्यस्वाभाविकीइतरेषांतुनैमित्तिकीतिनविरो
धः॥ ॥४२॥ क्षत्रियस्यगुणस्वभावकृतानिकर्माण्याह॥ ॥शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्य
पलायनं। दानमीश्वरभावश्चक्षात्रंकर्मस्वभावजं॥४३॥ शौर्यंविक्रमोबलवत्तरानपिप्रहर्तुंप्र
वृत्तिः। तेजःप्रागल्भ्यंपरैरधर्षणीयत्वं। धृतिर्महत्यामपिविपदिदेहेंद्रियसंघातस्यानवसा घु
दः। दाक्ष्यंदक्षभावः। सहसाप्रत्युत्पन्नेषुकार्येष्वव्यामोहेनप्रवृत्तिः। युद्धेचाप्यपलायनमपरा
ङ्मुखीभावः। दानंअसंकोचेनवित्तेषुस्वस्वत्वपरित्यागेनपरस्वत्वापादनं। ईश्वरभावःप्रजापा
लनार्थईशितव्येषुप्रभुशक्तिप्रकटीकरणंच। क्षात्रंकर्मक्षत्रियजातेर्विहितंकर्मस्वभावजंस
त्त्वोपसर्जनरजोगुणस्वभावजं॥४३॥ ॥कृषिगोरक्ष्यवाणिज्यंवैश्यकर्मस्वभावं। परिचर्यात्मकं
कर्मशूद्रस्यापिस्वभावजं॥४४॥ ॥कृषिरन्नोत्पत्त्यर्थंभूमेर्विलेखनं। गोरक्षस्यभावोगोरक्ष्यं
पाशुपाल्यंवाणिज्यं। वणिजःकर्मक्रयविक्रयादिलक्षणंकुसीदमप्यत्रांतर्गणनीयंवैश्यकर्मवै
श्यजातेःकर्मस्वभावजं। तमउपसर्जनरजोगुणस्वभावजं। परिचर्यात्मकंद्विजातिशुश्रूषात्मकं
कर्मशूद्रस्यापिस्वभावजंरजउपसर्जनतमोगुणस्वभावजं॥४४॥ तदेवंचतुर्णांवर्णानांस्वभा २०
वजाःगौणागौणाख्याधर्माःअभिहिताःअन्येपिधर्माःशास्त्रेष्वाम्नाताः। तदुक्तंभविष्यपुराणे।

57

धर्मः श्रेयः समुद्दिष्टं श्रेयोभ्युदयलक्षणं। स तु पंचविधः प्रोक्तो वेदमूलः सनातनः॥ वर्णधर्मः स्मृ-
तस्त्वेकः आश्रमाणामतः परं। वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तिकस्तथा। वर्णत्वमेकमाश्रित्य यो
धर्मः संप्रवर्त्तते। वर्णधर्मः स उक्तस्तु यथोपनयनं नृप। यस्त्वाश्रमं समाश्रित्य स्वधर्म अधिकारः
प्रवर्त्तते। स खल्वाश्रमधर्मः स्याद्भिक्षादंडादिको यथा। वर्णत्वमाश्रमत्वं च योधिकृत्य प्रवर्त्त-
ते। स वर्णाश्रमधर्मस्तु मौंज्याद्या मेखला यथा॥ यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते॥ यथा
मूर्द्धाभिषिक्तस्य प्रजानां परिपालनं। निमित्तमेकमाश्रित्य यो धर्मः संप्रवर्त्तते। नैमित्तिकः
स विज्ञेयः प्रायश्चित्तविधिर्यथा। अधिकारोत्र धर्मः। चतुर्विधं धर्ममाह। हरितः। अथाश्र-
मिणां पृथक् धर्मो विशेषधर्मसमानधर्मः। कृत्स्नधर्मश्चेति। पृथगाश्रमानुष्ठानात्। पृथ-
ग्धर्मो यथा चातुर्वर्ण्यधर्माः स्वाश्रमविशेषानुष्ठानं॥ विशेषधर्मो यथा नैष्ठिकयायावरानुज्ञा-
चा यिकैस्तौतुराश्रम्यसिद्धानां सर्वेषां यः समानो धर्मः स समानधर्मो नैष्ठिकः कृत्स्नधर्म इति।
नैष्ठिको ब्रह्मचारी विशेषः। यायावरगृहस्थविशेषः। अनुज्ञापिको वानप्रस्थे विशेषः।
चातुराश्रमसिद्धो यतिविशेषः। सर्वेषामिति वर्णानामाश्रमाणां च। तत्राद्यो यथा महाभा-
ते। आनृशंस्यमहिंसा चाप्रमादः संविभागिता। श्राद्धकर्माविधेयं च सत्यमक्रोध एव च।

58

अ०१८

शास्त्रेषु चत्वार आम्नाताः

स्वेषु दारेषु संतोषः शौचं नित्यानुसूयता। आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृप। सर्वाश्रमसाधारणस्त्वेषूदाहृतः। निष्ठा संसारसमाप्तिस्तत्प्रयोजनो नैष्ठिकः। मोक्षहेतुरात्मज्ञानोत्पत्तिप्रतिबंधप्रत्यवायपरिहाराय निष्कामकर्मानुष्ठानं स्वधर्म इत्यर्थः। आश्रमाश्चत्वारः शास्त्रेष्वाम्नाताः। यथाह गौतमः। तस्याश्रमविकल्पमेके ब्रुवते ब्रह्मचारी गृहस्थो भिक्षुर्वैखानस इति। आपस्तंबः। चत्वार आश्रमाः गार्हस्थ्यमाचार्यकुलं मौनं वानप्रस्थ्यमिति। तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छतीति वशिष्ठः। चत्वार आश्रमाः ब्रह्मचारी गृहस्थो वानप्रस्थः परिव्राजकास्तेषां वेदम- र्णो धीत्य वेदौ वेदान्वाऽविशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेदिति। एवं तेषां पृथग्धर्मा अप्याम्नाताः। तथा फलमप्याज्ञानामाम्नातं। यथाह मनुः। श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः। इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखं। अनुत्तमं सुखमिति यथाप्राप्तकर्मफलोपलक्षणार्थं। आपस्तंबः। सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखं ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं बलं वृत्तं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते। गौतमः। वर्णाश्रमाश्च स्वस्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तसुखमेधसो जन्म प्रतिपद्यंते विष्वंचो विपरीता नश्यंति। अत्र शेषशब्देनोक्तं ज्योतिष्टोमादिरिक्तं चित्रादिकर्मानुष्ठाय शा ३०

59

ब्दितमुच्यतेनतुपूर्वकर्मणएकदेशाइतिनिश्चितं। दृवास्ययेनुज्ञायवान्दृष्टस्मृतिस्यांयथेतमनेवंचेसन्नो
मदैरणुक्तंगोतमीयेपितच्छेषस्तस्मान्निचित्राद्यपेक्षयेति। विषेचः सर्वतोगामिनायथेष्टचेष्टाः स
विपरीतानरकादौजन्मप्रतिपद्यविनश्यंतिद्रुमिकीटादिभावेनसर्वपुरुषार्थेभ्योभ्रश्यंतइत्यर्थः।
हारितः। काम्यकेचियज्ञदानैस्तपोभिर्लब्ध्वालोकान्पुनरायांतिजन्म। कामैर्मुक्ताः सत्य यज्ञाः
सुदानास्तपोनिष्ठाअक्षयान्यांतिलोकान्। अत्रकामनासदसद्भावफलनिबंधनः फलेपिदो
दर्शितः। भविष्यत्पुराणे। फलेविनाप्यनुष्ठानेनित्यानामिष्यतेस्फुटं। काम्यानांस्वफलार्थंतुपो
षद्यानार्थमेवतु। नैमित्तिकानांकरणाकर्मणांत्रिविधंफलं। क्षयंकेचिदुपात्तस्यदुरितस्यप्र
चक्षते। अनुत्पत्तिंतथाचान्येप्रत्यवायस्यमन्वते। नित्यांक्रियांतथाचान्येअनुषंगफलांविदुः।
अन्येआपस्तंबादयः। तद्यथाम्रेफलार्थेनिमित्तइत्यादिवचनेनानुषंगिकफलतांनित्यकर्म
णोविदुः। श्रुतिश्च। त्रयोधर्मस्कंधाः यज्ञोऽध्ययनंदानमितिप्रथमस्तपएव। द्वितीयोब्रह्मचर्या
चार्यकुलवासी। तृतीयोत्यंतमात्मानमाचार्यकुलेवसादयन्नितिगृहस्थवानप्रस्थब्रह्मचारि
णउक्ताः सर्वएतेपुण्यलोकाभवंतीतितेषामंतःकरणशुध्यभावेमोक्षाभावमुक्त्वाशुद्धांतः
करणानामेषामेवपरिव्राजकभावेनज्ञाननिष्ठयामोक्षमाह। ब्रह्मसंस्थोमृतत्वमेतीति॥ ४८॥

अ०१८ तदेवं स्थिते ब्रह्मचारी गृहस्थो वानप्रस्थो वा मुमुक्षुः फलाभिसंधित्यागेन भगवदर्पणबुद्ध्या ॥ ॥ स्वे
स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥ ४५ ॥ ॥ स्वे स्वे
तत्तद्वर्णाश्रमविहिते न तु स्वेच्छामात्रकृते कर्मणि श्रुतिस्मृत्युदिते अभिरतः सम्यगनुष्ठानपरः ।
संसिद्धिं देहेंद्रियसंघातस्याशुद्धिक्षयेण सम्यग्ज्ञानोत्पत्तियोग्यतां लभते नरः । वर्णाश्रमाभि
मानी मनुष्यः मनुष्याधिकारत्वात्कर्मकांडस्य । देवादीनां वर्णाश्रमाभिमानित्वाभावाद्युक्त एव
तत्कर्मस्वनधिकारः । वर्णाश्रमाभिमानानां पक्षे तूपासनाधिकारस्तेषामप्यस्तीति साधितं दे
वताधिकरणे । ननु बंधहेतूनां कर्मणां कथं मोक्षहेतुत्वं । उपायविशेषादित्याह । स्वकर्मनिरतः
सिद्धिं । उक्तलक्षणां यथा येन प्रकारेण विंदति तच्छृणु । श्रुत्वा तं प्रकारमवधारयेत्यर्थः ॥ ४५ ॥
॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं । स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥ ४६ ॥
यतो मायोपाधिकचैतन्यानंदघनात्सर्वज्ञात्सर्वशक्तेरीश्वरादुपादानान्निमित्ताच्च सर्वांतर्यामि
णः प्रवृत्तिरुत्पत्तिर्मायामयी स्वप्नसृष्टरथादीनामिव । भूतानां भवनधर्मिणामाकाशादीनां ये
न चैकेन सद्रूपेण स्फुरणरूपेण च सर्वमिदं दृश्यजातं त्रिष्वपि कालेषु ततं व्याप्तं स्वात्मन्येवा
ध्यासितं ॥ कल्पितस्याधिष्ठानानतिरेकात् ॥ तथा च श्रुतिः । यतो वा इमानि भूतानि जायंते ये ६१
न जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति । अत्र यत इति प्रकृतौ

61

पंचमी। यतो येनेति चैकत्वं विवक्षितं। आनंदो ब्रह्मेति व्यजानात्। आनंदाद्ध्येव खल्विमानि भूतानि जा
यंते इति च तस्य निर्णयवाक्यं। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुतेस्तराच्च मायो
पाधित्वलाभः। यः सर्वज्ञः सर्वविदित्यादिश्रुतेस्तस्य सर्वज्ञत्वादिलाभः। एवं चेश्वरोत्तरवाक्ये भगवता
प्रकाशितः। यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततमिति। तमंतर्यामिणं भगवंतं स्वकर्मणा प्रति
वर्णाश्रमविहितेनाभ्यर्च्य तोषयित्वा तत्प्रसादादैकात्म्यज्ञाननिष्ठायोग्यतालक्षणां सिद्धिमंतः
करणशुद्धिं लभते मानवः। देवादिस्तूपासनामात्रेणेति भावः॥४६॥ यतः स्वधर्म एव मनुष्या
णां भगवत्प्रसादहेतुरतः॥ ॥श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वभावनियतं
कर्म कुर्वन्नाप्नोति किल्बिषं॥४७॥ परधर्मात्सम्यगनुष्ठितादपि श्रेयान्प्रशस्यतरः स्वधर्मो वि
गुणोऽसम्यगनुष्ठितोपि तस्मात् क्षत्रियेण सता त्वया स्वधर्मो युद्धादिरेवानुष्ठेयो न परधर्मो
भिक्षाटनादिरित्यभिप्रायः। ननु स्वधर्मोपि युद्धादिः स्वजनबंधुवधादिप्रत्यवायहेतुत्वान्ना
नुष्ठेय इति नेत्याह स्वभावनियतं पूर्वोक्तं शौर्यं तेज इत्यादिस्वभावजं युद्धादिकर्म कुर्वन् किल्बि
षं पापं बंधुवधादिनिमित्तं पापं न प्राप्नोति। तथा च प्राग्व्याख्यातं। सुखदुःखे समे कृत्वेत्यत्र। वि
हितज्योतिष्टोमांगपशुहिंसाया इव विहितयुद्धांगबंधुहिंसाया अपि प्रत्यवायहेतुत्वाभावा
त्। तथा चोक्तमधस्तात्॥४७॥ यस्मादेवं विहितहिंसादेर्न प्रत्यवायहेतुत्वं परधर्मश्च भयावहः

सामान्यदोषेणचसर्वकर्माणिदुष्टानितस्मादज्ञोवर्णाश्रमाभिमानी॥ ॥सहजंकर्मकौंतेयसदो अ०१८
षमपिनत्यजेत्। सर्वारंभाहिदोषेणधूमेनाग्निरिवावृताः॥४८॥ ॥हेकौंतेयसहजंस्वभाव
जंकर्मसदोषमपिविहितहिंसायुक्तमपिज्योतिष्टोमयुद्धादिनत्यजेत्। अंतःकरणशुद्धेःप्राग्भ्रमवा
नन्योवानह्यनात्मज्ञःकश्चित्क्षणमपिकर्माण्यकृत्वास्थातुंशक्नोति। नचपरधर्माननुतिष्ठन्नपि
दोषान्मुच्यते सर्वारंभाःस्वधर्माःपरधर्माश्चसर्वेहियस्माद्दोषेणत्रिगुणात्मकेनसामान्येना
वृताःव्याप्ताःसदोषाएवचप्राग्व्याख्यातं। परिणामतापसंस्कारैर्गुणवृत्तिविरोधाच्चदुःखमेव
सर्वंविवेकिनइति। तस्मादगत्यानात्मज्ञःकर्माणिकुर्वन्विषजलमिवविषंसहजंकर्मयु
द्धादित्रिगुणात्मकत्वेनसामान्येनबंधुवधादिनिमित्तत्वेनविशेषेणचसदोषमपिनत्यजेत्। सर्व
कर्मत्यागासमर्थःयोनित्यानित्यवस्तुविवेकजनेहामुत्रार्थभोगवैराग्यशमदमादिसंपन्नः
कर्मजांसिद्धिमशुद्धिपरिक्षयद्वारामुमुक्षुःशुद्धब्रह्मात्मैक्यजिज्ञासांप्राप्तःस्वस्वेष्टमोक्षहे
तुब्रह्मात्मैक्यज्ञानसाधनवेदांतवाक्यश्रवणादिकर्तुंसर्वविक्षेपनिवृत्त्यातच्छेषभूतंसर्व
कर्मसंन्यासंश्रुतिस्मृतिविहितंकुर्यादेव। तस्मादेवंविज्ञातानउपरतस्तितिक्षुःसमाहि
तोभूत्वात्मन्येवात्मानंपश्येदितिश्रुतेः। सत्यानृतेसुखदुःखेवेदानिमंलोकममुंचपरित्यज्या
त्मानमन्विच्छेदितिस्मृतेश्च। उपरतस्यक्तसर्वकर्मोपरतात्मानंपश्यदात्मदर्शनायवेदांतवा २२

८ स्तुशुद्धांतःकरणस्त्यजेदेवेत्यभिप्रायः॥४८॥ कःपुनः
सर्वत्यागसमर्थःयो

63

भ्यानिविचारयेदितिश्रुत्यर्थः। एतादृशएवब्रह्मसंस्थोमृतत्वमेतीतिश्रुत्यासाधर्मस्कंधत्रयविलक्षणत्वेन
प्रतिपादितः। परमहंसपरिव्राजकः परमहंसपरिव्राजकैर्वृतदन्यंगुरुमुपसृत्यवेदांतवाक्यविचा
रसमर्थयितुमुपदिश्याथातोब्रह्मजिज्ञासेत्यादिचतुर्लक्षणमीमांसांभगवताबादरायणेनसमा
रेभिकीदृशोऽसावित्याह॥ असक्तबुद्धिःसर्वत्रजितात्माविगतस्पृहः॥ नैष्कर्म्यसिद्धिंपरमांसंन्या
सेनाधिगच्छति॥४९॥ सर्वत्रपुत्रदारादिषुसक्तिनिमित्तेष्वपिसक्तबुद्धिःअहमेषांसेन्योरममेतइ
त्यभिषंगरहिताबुद्धिर्यस्यसः। यतोजितात्माविषयेभ्यःप्रत्याहृत्यवशीकृतांतःकरणः। विषय
रागेसतिकथंप्रत्याहरणंतत्राहविगतस्पृहःदेहजीवितभोगेष्वपिवांछारहितः। सर्वदृश्येषु
दोषदर्शनेननित्यबोधपरमानंदरूपमोक्षगुणदर्शनेनचसर्वतोविरक्तइत्यर्थः। यएवंशुद्धां
तःकरणःस्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवइतिवचनप्रतिपादितांकर्मजांपरमांसि
द्धिंज्ञानसाधनवेदांतवाक्यविचाराधिकारलक्षणांज्ञाननिष्ठायोग्यतांप्राप्तः॥ ससंन्यासेशि
खायज्ञोपवीतादिसहितकर्मत्यागेनहेतुनातत्पूर्वकेनविचारेणेत्यर्थः। नैष्कर्म्यसिद्धिंनिष्कर्म
ब्रह्मतद्विषयंविचारपरिनिष्पन्नंज्ञानंनैष्कर्म्यंतद्रूपांसिद्धिंपरमांकर्मजायाअपरमसिद्धेःफलभू
तांअधिगच्छतिसाधनपरिपाकेनप्राप्नोति। अथवासंन्यासेनेतीत्थंभूतलक्षणेतृतीया। सर्व

64

अ०१८

कर्मसंन्यासरूपां नैष्कर्म्यसिद्धिं ब्रह्मसाक्षात्कारयोग्यतां नैर्गुण्यलक्षणां सिद्धिं पूर्वस्याः सिद्धेः सात्विक्याः
फलभूताम् अधिगच्छतीत्यर्थः ॥४९॥ प्रागुक्तसाधनसंपन्नस्य सर्वसंन्यासिनो ब्रह्मज्ञानोत्पत्तौ साध
नक्रममाह ॥ ॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ॥ समासेनैव कौन्तेय निष्ठा ज्ञानस्य या
परा ॥ ॥५०॥ सर्वकर्मणेश्वरमाराध्य तत्प्रसादजां सर्वकर्मत्यागपर्यंतां ज्ञानोत्पत्तियोग्यतारूपां
सिद्धिमंतःकरणशुद्धिं प्राप्तो यथा ब्रह्म प्राप्तो येन प्रकारेण शुद्धात्मानं साक्षात्करोति तथा तं प्रकारं
निबोध मे तद्वचनादवधारयानुष्ठातुं । किमिति विस्तरेण नेत्याह । समासेन संक्षेपेणैव न तु वि
स्तरेण कौन्तेय तदेवावधारणे किं स्यादित्यत आह । निष्ठा ज्ञानस्य या परा । ज्ञानस्य विचारपरि
निष्पन्नस्य निष्ठा परिसमाप्तिः यदनंतरं साधनांतरं नानुष्ठेयमस्ति परा श्रेष्ठा सर्वसाधनसाक्षा
न्मोक्षहेतुत्वात् । तां सिद्धिं प्राप्तस्य ब्रह्मप्राप्तरूपां ज्ञाननिष्ठां परां संक्षेपेण निबोधेत्यर्थः ॥५०॥
सेयं ज्ञाननिष्ठा सप्रकारोच्यते ॥ ॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च । शब्दादीन्विष
यांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥ विशुद्धया सर्वसंशयविपर्ययशून्यया बुद्ध्याऽहं ब्रह्मास्मीति
वेदांतवाक्यजन्यया बुद्धिवृत्त्या युक्तः सदा तदान्वितः । धृत्या धैर्येणात्मानं शरीरेंद्रियसंघातं नि
यम्य उन्मार्गप्रवर्त्तेर्निवार्यात्मप्रवणं कृत्वा । चशब्देन योगशास्त्रोक्तसाधनांतरं समुच्चीयते ।
शब्दादीन् शब्दस्पर्शरूपरसगंधान्विषयान्भोगेन बंधहेतून् सामर्थ्याज्ज्ञाननिष्ठार्थं शरीर

३२

स्थितिमात्रप्रयोजनानुपयुक्तान्निषिद्धानपि त्यक्त्वा शरीरस्थितिमात्रार्थेषु च तेषु रागद्वेषौ व्युदस्य च
परित्यज्य चकारादन्यदपि ज्ञानविक्षेपकं परित्यज्य विविक्तसेवीत्यत्रत्यादिरध्याहृतेन ब्रह्म
भूयाय कल्पत इत्यनेनान्वयः ॥५१॥ ॥विविक्तसेवी लघ्वाशी यतवाक्कायमानसः। ध्यान
योगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥ ॥विविक्तं जनसंमर्दरहितं पवित्रं च यदरण्य
गिरिगुहादि तत्सेवितुं शीलं यस्य स चित्तैकाग्र्यसंपत्त्यर्थं तद्विक्षेपकारिरहित इत्यर्थः। लघ्वा
शी लघु परिमितं हितं मध्यं वाशितुं शीलं यस्य निद्रालस्यादिचित्तलयकारिरहित इत्यर्थः।
यतानि संयतानि वाक्कायमानसानि येन स यमनियमासनादिसाधनसंपन्न इत्यर्थः। ध्यान
योगपरो नित्यं चित्तस्यात्माकारप्रत्यया वृत्तिर्ध्यानं। आत्माकारप्रत्ययेन निर्वृत्तिकतापादनं यो
गः नित्यं सदैव तत्परस्तयोरनुष्ठानपरो न तु मंत्रजपतीर्थयात्रादिपरः कदाचिदित्यर्थः। वैरा
ग्यं दृष्टादृष्टविषयेषु स्पृहाविरोधि चित्तपरिणामं समुपाश्रितः सम्यङ्निश्चलत्वेन नित्यमा
श्रितः ॥५२॥ ॥अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं॥ विमुच्य निर्ममः शांतो ब्रह्मभूया
य कल्पते ॥५३॥ ॥अहंकारं माहाकुलप्रसूतोहं महतां शिष्योतिविरक्तोस्मि नास्ति द्वितीयो म
त्सम इत्यभिमानं। बलं असदाग्रहो न तस्य स्वाभाविकत्वेन त्यक्तुमशक्यत्वात्। दर्पं हर्षजन्यं म

अ०१८ दंधर्मातिक्रमकारणं।हृष्टोदृप्यतिदृप्तोधर्ममतिक्रामतीतिस्मृतेः।कामंविषयाभिलाषंवैराग्यं
समुपाश्रितइत्यनेनोक्तस्यापिकामत्यागस्यपुनर्वचनंयत्नाधिक्यार्थं।क्रोधंद्वेषं।परिग्रहं
शरीरधारणार्थमस्पृहत्वेपिपरोपनीतंबाह्योपकरणंविमुच्यत्यक्त्वाशिखायज्ञोपवीतादि
कमपिदंडमेकंकमंडलुंकौपीनाच्छादनंचशास्त्राभ्यनुज्ञातंस्वशरीरयात्रार्थमादायपरमहं
सपरिव्राजकोभूत्वानिर्ममोदेहजीवनमात्रेपिममकाररहितः।अतएवाहंकारममकारा
भावादपगतहर्षविषादत्वात्।शांतश्चित्तविक्षेपरहितोयतिर्ज्ञानसाधनपरिपाकक्रमेणब्रह्म
भूयायसाक्षात्कारायकल्पतेसमर्थोभवति॥५३॥केनक्रमेणब्रह्मभूयायकल्पतइतितदा
ह॥ ॥ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्षति।समःसर्वेषुभूतेषुमद्भक्तिंलभतेपरां॥
॥५४॥ब्रह्मभूतःअहंब्रह्मास्मीतिदृढनिश्चयवान्श्रवणमननाभ्यांप्रसन्नात्माशुद्धचित्तः
शमदमाद्यभ्यासात्।अतएवनशोचतिनष्टंनकांक्षत्यप्राप्तं।अतएवविग्रहानुग्रहयोरना
रंभात्समः।सर्वेषुभूतेषुआत्मौपम्येनसर्वत्रसुखंदुःखंचपश्यतीत्यर्थः।एवंभूतोज्ञाननिष्ठो
यतिर्मद्भक्तिंमयिभगवतिशुद्धेपरमात्मन्युपासनांमदाकारचित्तवृत्त्यावृत्तिरूपांपरिपक्व
निदिध्यासनाख्यांश्रवणमननाभ्यासफलभूतांलभतेपरांश्रेष्ठामव्यवधानेनसाक्षात्कार ६४

67

फलां चतुर्विधा भजंते मामित्यत्रोक्तस्य भक्तिचतुष्टयस्यांत्यां ज्ञानलक्षणामितिवा ॥५४॥ ततश्च ॥
॥भक्त्या मामभिजानाति यावान्यश्चास्मि तत्वतः। ततो मां तत्वतो ज्ञात्वा विशते तदनंतरं ॥५५॥ भ-
क्त्या निदिध्यासनात्मिकया ज्ञाननिष्ठया मामद्वितीयमात्मानमभिजानाति साक्षात्करोति या-
वान् विभुर्नित्यश्च यश्च परिपूर्णसत्यज्ञानानंदघनः सदा विध्वस्तसर्वोपाधिरखंडैकरसए-
कस्तावंतं चाभिजानाति ततो मामेवं तत्वतो ज्ञात्वा अहमस्म्यखंडानंदाद्वितीयं ब्रह्मेति साक्षात्कृ-
स्य विज्ञातेऽज्ञानतत्कार्यनिवृत्तौ सर्वोपाधिशून्यतया सद्रूप एव भवति। तदनंतरं बलवत्प्रारब्ध-
कर्मभोगेन देहपातानंतरं न तु ज्ञानानंतरमेवोत्काप्रसयेनैव तल्लाभस्तदनंतरमित्यस्य वैयर्थ्यापा-
तात्। तस्मात्तस्य तादेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्यत इति श्रुत्यर्थ एवात्र दर्शितो भगवता।
यद्यपि ज्ञानेनाज्ञानं निवर्तितमेव दीपेनेव तमस्तस्य तद्विरोधिस्वभावत्वात्। तथापि तदुपादे-
यमहंकारदेहादि निरूपादानमेव यावत्प्रारब्धकर्मभोगमनुवर्तते दृष्टत्वादेव। नहि दृष्टेऽनुप-
पन्नं नाम। तार्किकैरपि हि समवायिकारणनाशाद्द्रव्यनाशमंगीकुर्वद्भिर्निरूपादानं द्रव्यं क्ष-
णमात्रं तिष्ठतीत्यंगीकृतं। नित्यपरमाणुसमवेतद्व्यणुकनाशे त्वसमवायिकारणनाशादे-
व द्रव्यनाशः समवायनिरूपितकारणनाशात्वमुभयोरनुगतमिति नाननुगमः। येत्वसम

अ०१८ वायिकारणनाशमेवसर्वत्रकार्यद्रव्यनाशकमिच्छंति।तेषामाश्रयनाशस्थलेक्षणद्वयमनुपादानेका
र्यंतिष्ठति।एवंचतत्रैवप्रतिबंधकसन्निपातेबहुकालावस्थितिःकेनवार्यतेप्रारब्धकर्मणश्चप्रतिबं
धकत्वंश्रुतिसिद्धं।अंतःकरणदेहाद्यवस्थितेरन्यथानुपपत्तिसिद्धंच।एवंशिष्यसेवकाद्यदृष्ट-
मपितत्प्रतिबंधकंतदभावमपेक्ष्यस्वपूर्वसिद्धं एवाज्ञाननाशस्तत्कार्यमंतःकरणादिकंनाश
यतीतिनपुनर्ज्ञानापेक्षा।तदुक्तं।तीर्थेश्वपचगृहेवानष्टस्मृतिरपित्यजंदेहं।ज्ञानसमकाले
मुक्तः।कैवल्यंयातिहतशोकइतिनजानामीत्यादिप्रत्ययस्तुतस्यनिवृत्ताज्ञानस्याप्यज्ञान
नाशजनितादनुपादानात्साक्षादात्माश्रयादेवाज्ञानसंस्काराच्चतत्त्वज्ञानसंस्कारनिवर्त्यादं
तःकरणाद्यवस्थित्यवधेरितिविवरणादुक्तेः।अहंब्रह्मास्मीतिचरमसाक्षात्कारानंतरमहंब्रह्मन
भवामिनजानामीत्यादिप्रत्ययोनास्त्येव।यदिपरेघटंनजानामीत्यादिप्रत्ययःस्याच्चेदुपा
दानायत्त्वसंस्कारकल्पनेतिनानुपपन्नं।अज्ञानलेशपदेनाप्ययमेवसंस्कारोविवक्षितः।
नहिसावयवमज्ञानंयेनकियन्नश्यतिकियत्तिष्ठतीतिवाच्यं।अनिर्वचनीयत्वादेकदेशाभ्यु
पगमेतुतन्निवृत्त्यर्थंपुनश्चरमंज्ञानमपेक्षितमेव।तच्चमत्पत्तिकालेदुर्घटमितितत्त्वज्ञानसंस्का
रनाश्यतानतस्याभ्युपेया।नतस्यसंस्कारपक्षान्नकोपिविशेषइतिपूर्वोक्तैवकल्पनाश्रेयसी। ३८

इदृशाजीवन्मुक्त्यपेक्षयाचप्राग्भवतोक्तमुपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्शिनइतिस्थितप्रज्ञ
लक्षणानिचप्राग्व्याख्यातानि।तस्मात्साधूक्तंविशतेतदनंतरमिति।।५५।।ननुयोऽनात्मज्ञोऽशु
द्धांतःकरणःसोंतःकरणशुद्धिपर्यंतंसहजंकर्मनत्यजेत्।यस्तुशुद्धांतःकरणःसनैष्कर्म्यसि
द्धिंसंन्यासेनाधिगच्छतीत्युक्तं।संन्यासश्चब्राह्मणेनैवकर्त्तव्योनक्षत्रियवैश्याभ्यामितिप्रा
गुक्तं।।भगवता।कर्मणैवहिसंसिद्धिमास्थिताजनकादयइत्यत्र।तत्रशुद्धांतःकरणोनक्षत्रि
यादिःकिंकर्मण्यनुष्ठेययानिकिंसर्वकर्मसंन्यासःकर्त्तव्यः।नाद्यः।आरुरुक्षोर्मुनेर्योगंक
र्मकारणमुच्यते।योगारूढस्यतस्यैवशमःकारणमुच्यतइत्यादिना।।योगमंतःकरणशुद्धि
मारूढस्यकर्मानुष्ठाननिषेधात्।नद्वितीयःस्वधर्मेनिधनंश्रेयपरधर्मोभयावहइत्यादिना।।
ब्राह्मणधर्मस्यसर्वकर्मसंन्यासस्यक्षत्रियादिकंप्रतिप्रतिनिषेधात्।नचकर्मानुष्ठानकर्म
त्यागयोरन्यतरमंतरेणतृतीयःप्रकारोस्ति।तस्मादुभयोरपिप्रतिषिद्धत्वेनागत्येतराभावे
न्चावश्यकर्त्तव्यप्रतिषेधातिक्रमेकर्मत्यागएवश्रेयान्।बंधहेतुपरित्यागेनमोक्षसाधन
पौष्कल्यात्।नतुकर्माण्यनुष्ठेयानिचित्तविक्षेपहेतुत्वेनमोक्षसाधनज्ञानप्रतिबंधकत्वा
दित्याभिप्रायमर्जुनस्याहभगवान्।। ।।सर्वकर्माण्यपिसदाकुर्वाणोमद्व्यपाश्रयः।।मत्प्र

अ०१८ सादादवाप्नोतिशाश्वतंपदमव्ययं॥ ॥५६॥ यःपूर्वोक्तैःकर्मभिःशुद्धांतःकरणःसोवश्यंभगवदे
कशरणतात्पर्यंनिसादंतःकरणाशुद्धेःएतादृशश्चेद्ब्राह्मणःसंन्यासप्रतिबंधरहितःसर्वकर्मा
णिसंन्यस्यतुनाम।संसारविमोक्षस्तुतस्यभगवदेकशरणस्यभगवत्प्रसादादेव।एतादृ
शश्चेत्क्षत्रियादिःसंन्यासानाधिकारीसकरोतुनामकर्माणिकिंतुमद्व्यपाश्रयः।अहंभ
वान्वासुदेवएवव्यपाश्रयःशरणंयस्यसमदेकशरणोमय्यर्पितसर्वात्मभावःसंन्यासानधि
कारात्सर्वकर्माणिसर्वाणिकर्माणिवर्णाश्रमधर्मरूपाणिलौकिकानिप्रतिषिद्धानिवासदा
कुर्वाणोमत्प्रसादान्ममेश्वरस्यानुग्रहात्।अवाप्नोति।हिरण्यगर्भादिवन्मद्विज्ञानोत्पत्याशा
श्वतंनित्यंपदंवैष्णवंअव्ययंअपरिणामि।एतादृशोभगवदेकशरणःकरोत्येवनप्रतिषि
द्धानिकर्माणियदिकुर्यात्तथापिमत्प्रसादात्प्रत्यवायानुत्पत्त्यामद्विज्ञानेनमोक्षभाग्भवतीति
भगवदेकशरणतास्तुसर्वथासर्वकर्माणिसर्वदाकुर्वाणोपीत्यनूद्यते॥५६॥ ॥यस्मान्मदेक
शरणतामात्रंमोक्षसाधनंनकर्मानुष्ठानंकर्मसंन्यासोवातस्मात्क्षत्रियस्त्वं॥ ॥चेतसा
सर्वकर्माणिमयिसंन्यस्यमत्परः।बुद्धियोगमुपाश्रित्यमच्चित्तःसततंभव॥५७॥ ॥चेतसा
विवेकबुद्ध्यासर्वकर्माणिदृष्टादृष्टार्थानिमयीश्वरेसंन्यस्ययत्करोषियदश्नासीत्युक्ता ७८

71

न्यायेनसमर्प्यमत्परःअहंभगवान्वासुदेवपरःप्रियतमोयस्यसमत्परःसन्बुद्धियोगंपूर्वोक्तंस
मत्वबुद्धिलक्षणंयोगंबंधहेतोरपिकर्मणोमोक्षहेतुत्वसंपादकंअपाश्रित्यअनन्यशरणतया
स्वीकृत्यसमच्चित्तःमयिभगवतिवासुदेवएवचित्तंयस्यनराजनिकामिन्यादौवासमच्चित्तः
सततंभव॥५७॥ततःकिंस्यादितितदाह॥ ॥मच्चित्तःसर्वदुर्गाणिमत्प्रसादात्तरिष्यसि।
अथचेत्त्वमहंकारान्नश्रोष्यसिविनंक्ष्यसि॥ ॥५८॥मच्चित्तस्त्वंसर्वदुर्गाणिदुस्तराणिका
मक्रोधादीनिसंसारदुःखसाधनानिमत्प्रसादात्स्वव्यापारमंतरेणैवतरिष्यसिअनायासे
नैवातिक्रमिष्यसि।अथचेद्यदित्वंमदुक्तेविश्वासमकृत्वाऽहंकारात्पंडितोहमिति
गर्वान्नश्रोष्यसिमद्वचनार्थंनकरिष्यसिततोविनंक्ष्यसि।पुरुषार्थाद्भ्रष्टोभविष्यसि।कामका
रेणसंन्यासाद्याचरणात्॥५८॥त्वंच॥ ॥यदहंकारमाश्रित्यनयोत्स्यइतिमन्यसे।मिथ्यै
षव्यवसायस्तेप्रकृतिस्त्वांनियोक्ष्यति॥५९॥ ॥अहंकारंधार्मिकोहंक्रूरकर्मनकरिष्या
मीतिमिथ्याभिमानमाश्रित्यनयोत्स्येयुद्धंनकरिष्यामीतिमन्यसेयत्तुमिथ्यानिष्फलएषव्य
वसायोनिश्चयस्तेतवयस्मात्प्रकृतिःक्षत्रजात्यारंभकोरजोगुणास्वभावस्त्वांनियोक्ष्यति
प्रेरयिष्यतियुद्धे॥५९॥प्रकृतिंविवृणोति॥ ॥स्वभावजेनकौंतेयनिबद्धःस्वेनकर्मणा।

अ०१८

कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत्॥ ॥६०॥ स्वभावजेन पूर्वोक्तक्षत्रिस्वभावजेन शौर्यादिना
स्वेनानागंतुकेन कर्मणा निबद्धो वशीकृतः सन् हे कौंतेय यद्बंधुवधादिनिमित्तं युद्धं मोहात्स्वतंत्रोहं यथे
च्छामि तथा संपादयिष्यामीति भ्रमात्कर्तुं नेच्छसि। तदवशोपि अनिच्छन्नपि स्वाभाविककर्मपरतं
त्रः परमेश्वरतंत्रश्च करिष्यस्येव॥६०॥ स्वभावाधीनतामुक्त्वेश्वराधीनतामाविवृणोति॥ ॥ईश्वरः
सर्वभूतानां हृद्देशेर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया॥६१॥ ॥ईश्वरः ईशन
शीलो नारायणः सर्वांतर्यामी यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं
यः पृथिवीमंतरो यमयति। यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा। अंतर्बहिश्च तत्सर्वं व्याप्य
नारायण[illegible] इत्यादिश्रुतिसिद्धः सर्वभूतानां सर्वेषां प्राणिनां हृद्देशेंतःकरणे तिष्ठति सर्वव्याप
कोपि तत्राभिव्यज्यते। सप्तद्वीपाधिपतिरिव राममुत्तरकोशलायां। हे अर्जुन हे शुद्धांतःकर
ण एतादृशामीश्वरं ज्ञातुं योग्योसीति ध्वन्यते। किं कुर्वन्तिष्ठति। भ्रामयन्नितस्ततश्चालयन् स
र्वाणि भूतानि परतंत्राणि मायया छद्मना॥ यंत्रारूढानीव सूत्रसंचारादियंत्रमारूढानि दारुनिर्मि
तपुरुषादीन्यसंतपरतंत्राणि यथा मायावी भ्रामयति तद्वदिति सूत्रशेषः॥६१॥ ईश्वरः सर्वभू ७
तानि परतंत्राणि प्रेरयति चेत्स्यात्तं विधिप्रतिषेधशास्त्रस्य सर्वस्य पुरुषकारस्य चानर्थक्यमिति

73

ती

त्राह॥ ॥तमेव शरणं गच्छ सर्वभावेन भारत। तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं॥६२॥ तमेवेश्वरं शरणमाश्रयं संसारसमुद्रोत्तरणार्थं गच्छ आश्रय सर्वभावेन सर्वात्मना मनसा वाचा कर्मणा च हे भारत। तत्प्रसादात्तस्यैवेश्वरस्यानुग्रहात्तत्वज्ञानोत्पत्तिपर्यंतात्परां शांतिं सकार्याविद्यानिवृत्तिं स्थानं अद्वितीयस्वप्रकाशपरमानंदरूपेणावस्थानं शाश्वतं नित्यं प्राप्स्यसि॥६२॥ सर्वगीतार्थमुपसंहरन्नाह॥ ॥इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया। विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥६३॥ इति अनेन प्रकारेण ते तुभ्यमयंतप्रियाय ज्ञानमात्ममात्रविषयं मोक्षसाधनं गुह्याद्गुह्यतरं परमरहस्यादपि संन्यासांतात्कर्मयोगाद्रहस्यतरं तत्फलत्वात्। आख्यातं समंतात्कथितं मया सर्वज्ञेन परमाप्तेन। अतो विमृश्य पर्यालोच्य एतन्मयोपदिष्टं गीताशास्त्रमशेषेण सामस्त्येन सर्वैकवाक्यतया ज्ञात्वा स्वाधिकारानुरूपेण यथेच्छसि तथा कुरु। न त्वेतदविमृश्यैव कामकारेण यत्किंचिदित्यर्थः। अत्र चैतावदुक्तं। अशुद्धांतःकरणस्य मुमुक्षोर्मोक्षसाधनज्ञानोत्पत्तियोग्यताप्रतिबंधकपापक्षयार्थं फलाभिसंधिपरित्यागेन भगवदर्पणबुद्ध्या वर्णाश्रमधर्मानुष्ठान॥ नतः शुद्धांतःकरणस्य विविदिशोत्पत्तौ गुरुमुपसृत्य ज्ञानसाधनवेदांतवाक्यविचाय ब्राह्मणस्य सर्वकर्मसंन्यासः। ततो भगवदेकशरणतया विविक्तसेवादिसाधनाभ्यासाच्छ्रवणमनननिदिध्यासनैरात्मसाक्षात्कारात्सद्योमोक्ष इति। क्षत्रियादस्तु संन्यासानधिकारिणो मुमुक्षोरंतःकरण

उ०९८

स्युष्यनंतरमपिभगवदाज्ञापालनायलोकसंग्रहायच यथाकथंचित्कर्मापिकुर्वतोपिभगवदेकशरण
नयापूर्वजन्मकृतसंन्यासादिपरिपाकाद्वाहिरण्यगर्भन्यायेनतदनपेक्षणोद्वाभगवदनुग्रहमात्रे
णैवतत्वज्ञानोत्पत्त्याग्रिजन्मनिब्राह्मणजन्मलाभेनसंन्यासादिपूर्वकज्ञानोत्पत्त्यावामोक्ष इति। अ
एवंविचारितेचनास्तिमोहावकाशइतिभावः।।६३।।अतिगंभीरस्यगीताशास्त्रस्याशेषतःप
र्यालोचनक्लेशनिवृत्तयेदययास्वयमेवतस्यसारंसंक्षिप्यकथयति।। ।।सर्वगुह्यतमंभूयः
शृणुमेपरमंवचः।इष्टोसिमेदृढमितिस्ततोवक्ष्यामितेहितं।।६४।। ।।पूर्वंहिगुह्यात्कर्मयोगा
द्गुह्यतरंज्ञानमाख्यातमधुनातुकर्मयोगात्तत्फलभूतज्ञानाच्चसर्वस्मादतिशयेनगुह्यंरहस्यं
गुह्यतमंपरमंसर्वतःप्रकृष्टंमेममवचोवाक्यंभूयःतत्रतत्रोक्तमपित्वदनुग्रहार्थंपुनर्वक्ष्यमाणं
शृणु।नलाभपूजाख्यात्याद्यर्थंत्वांब्रवीमिकिंतु।इष्टःप्रियोसिमेममदृढमतिशयेनइतियतस्तत
स्तेनैवेष्टत्वेनवक्ष्यामिकथयिष्यामिअपृष्टोपिसन्नहंतेतवहितंपरंश्रेयः।।६४।।तदेवाह।। ।।
मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु।मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे।।६५।। ।।
मयिभगवतिवासुदेवेमनोयस्यसमन्मनाःभवसदामांचिंतय द्वेषेणकंसशिशुपालादिरपि ७८
तथाऽतआह।मद्भक्तःप्रेम्णामय्यनुरक्तःमद्विषयेणानुरागेणसदामद्विषयंमनःकुर्वीतिविधी
यते।।तद्विषयोनुरागएवकेनस्यादित्यतआह।।मद्याजीमांयष्टुंपूजयितुंशीलंयस्यसदाम

पूजापरोभव।पूजोपकरणाभावेतुमांनमस्कुरु।कायेनवाचामनसाचप्रह्वीभवनेनाराधय।इदंचार्च
नवंदनंचान्येषामपिभागवतधर्माणामुपलक्षणं।तथाचोक्तंश्रीभागवते।श्रवणंकीर्त्तनंविष्णोः
स्मरणंपादसेवनं।अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनं।इतिपुंसार्पिताविष्णौभक्तिश्चेन्न
वलक्षणा।क्रियतेभगवत्यद्धातन्मन्येऽधीतमुत्तममिति।एतच्चभक्तिरसायनेव्याख्या।तं
विस्तरेण।एवंसदाभागवतधर्मानुष्ठानेनमय्यनुरागोत्पत्त्यामन्मनाःसन्मांभगवंतंवासु
देवमेवएष्यसिप्राप्स्यसिवेदांतवाक्यजनितेनमद्बोधेनत्वंचात्रसंशयंमाकार्षीःसत्यंय
थार्थंतेतुभ्यंप्रतिजानेसत्यामेवप्रतिज्ञांकरोम्यस्मिन्नर्थेयतःप्रियोसिमेप्रियस्यप्रत
रणानोचितैवेतिभावः॥ससंतेप्रारब्धकर्मणांतेसतिमामेष्यसीतिवा।अनुवादा
पेक्षयाविश्वासदार्ढ्यप्रयोजनंप्रथमंव्याख्यानमेवश्रेयः।अनेनयत्पूर्वमुक्तं।यतःप्रवृत्ति
र्भूतानांयेनसर्वमिदंततं॥स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवइतितद्व्याख्यातं।मच्छब्देने
श्वरत्वप्रकटनात्॥६५॥अधुनातुईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठतितमेवसर्वभावेनश
रणंगच्छेतियदुक्तंतद्विवृणोति॥ ॥सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज।अहंत्वासर्वपापे
भ्योमोक्षयिष्यामिमाशुचः॥६६॥केचित्तुवर्णधर्माःकेचिदाश्रमधर्माःकेचित्सामान्यधर्मा

अ०१८ इत्येवंसर्वानपि धर्मान्परित्यज्य विद्यमानानविद्यमानान्वाशरणत्वेनानादृत्य मामीश्वरमेकमद्विती
यंसर्वधर्माणामधिष्ठातारंफलदातारंचशरणंव्रज। धर्माःसंतुनसंतुवाकिंतैरन्यसापेक्षैःभग
वदनुग्रहादेवत्वन्यनिरपेक्षादहंकृतार्थोभविष्यामीतिनिश्चयेनपरमानंदघनमूर्त्तिमनंतं
श्रीवासुदेवमेवभगवंतमनुक्षणभावनयाभजस्वइदमेवपरमंतत्त्वंनातोधिकमस्तीतिविचा
रपूर्वकेनप्रेमप्रकर्षेणसर्वानात्मचिंताशून्यतयामनोवृत्यातैलधारावदविच्छिन्नयासततं
चिंतयेत्यर्थः। अत्रमामेकंशरणंव्रजेत्यनेनैवसर्वधर्मशरणतापरित्यागेलब्धेसर्वधर्मान्परि
त्यज्येतिनिषेधानुवादस्तत्कार्यकारितालाभाय। यज्ञायज्ञियसाम्निएरंकृत्वोद्गेयमित्यत्रानृगि
रागिरेतिब्रूयादितिवत्। तथाचमामेवसर्वधर्मकार्यकारित्वान्मदेकशरणस्यनास्तिधर्मापेक्षे
त्यर्थः॥ एतेनेदमपास्तंसर्वधर्मान्परित्यज्येत्युक्तेनाधर्माणांपरित्यागोलभ्यतेअतोधर्मपदं
कर्ममात्रपरमिति। नह्यत्रकर्मत्यागोविधीयते। अपितुविद्यमानेपिकर्मणितत्रानादरेणभ
गवदेकशरणतामात्रंब्रह्मचारिगृहस्थवानप्रस्थभिक्षूणांसाधारण्येनानुविधीयते। तत्रसर्वध
र्मान्परित्यज्येतितेषांस्वधर्मादरसंभवेनतन्निवारणार्थंअधर्मेचानर्थफलकेकस्याप्यादराभा
वात्तत्परित्यागवचनमनर्थकमेवशास्त्रांतरप्राप्तत्वाच्च। तस्माद्वर्णाश्रमधर्माणामभ्युदयहेतुत्व ३९

प्रसिद्धेर्मोक्षहेतुत्वमपि स्यादितिशंकानिराकरणार्थमेवैतद्वचनं इति नाद्यं॥ नचसर्वधर्माधर्म
परित्यागोत्र विधीयते। संन्यासशास्त्रेन प्रतिषेधशास्त्रेण चतद्वैयर्थ्यत्वादेव॥ नचेदमपि संन्यास
शास्त्रं। भगवदेकशरणतायाः विधित्सितत्वात्। तस्मात्सर्वधर्मान्परित्यज्येत्यनुवाद एव सर्वेषां
तु शास्त्राणां परमं रहस्यमीश्वरशरणतैवेति तत्रैव शास्त्रपरिसमाप्तिर्भगवताद्धता। तामंत
रेण संन्यासस्यापि स्वफलपर्यवसायित्वात्। अर्जुनं च क्षत्रियं संन्यासानधिकारिणं प्रतिसं
न्यासोपदेशायोगात्। अर्जुनव्याजेन मनुष्योपदेशे तु वक्ष्यामि ते हितं त्वां मोक्षयिष्यामि सर्व
पापेभ्यस्त्वं मा शुच इति चोपक्रमोपसंहारो न स्यात्। तस्मात्संन्यासधर्मे विध्यनादरेण भग
वदेकशरणतामात्रे तात्पर्यं भगवतः॥ यस्मात्त्वं मदेकशरणः स्वधर्मानादरेण। अतोहं सर्वध
र्मकार्यकारित्वात्सर्वपापेभ्यो बंधुवधादिनिमित्तेभ्यः संसारहेतुभ्यो मोक्षयिष्यामि प्रायश्चित्तं
विनैव। धर्मेण पापमपनुदतीति श्रुतेर्धर्मस्थानीयत्वाच्च मम। अतो मा शुचः॥ युद्धेषु प्रवृत्तस्य
मम बंधुवधादिनिमित्तप्रत्यवायात्कथं निस्तारः स्यादिति शोकमाकर्षीः। भाष्यकारैर्निरस्ता
नि दुर्मतानीह विस्तरात्। ग्रंथव्याख्यानमात्रार्थिनि तदर्थमहं यते। तस्यैवाहं ममैवासौ स
एवाहमिति त्रेधा। भगवच्छरणत्वं स्यात्साधनाभ्यासपाकतः विशेषा वर्णितास्माभिः स

78

७२०१ वीरभक्तिरसायने। ग्रंथविस्तरभीरुत्वादिदमात्रमिह कथ्यते। तत्राद्यं मृदु यथा। सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वं। सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः। द्वितीयं मध्यमं यथा। हस्तमुत्क्षिप्य यातोऽसि बलात्कृष्ण किमद्भुतं। हृदयाद्यदि निर्यासि पौरुषं गणयामि ते॥ तृतीयमधिमात्रं यथा। सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः इति मतिरमला भवत्यनंते हृदयगते व्रजतान्विहाय दूरादिति दूतं प्रति यमवचनं। अंबरीषप्रल्हादगोपीप्रभृतयश्चास्यां भूमिकायां मुदाहर्तव्याः। अस्मिन्हि गीताशास्त्रे निष्ठात्रयं साध्यसाधनभावापन्नं विवक्षितं मुक्तये च बहुधा। तत्र कर्मनिष्ठा सर्वकर्मसंन्यासपर्यंतोपसंहृता स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इत्यत्र। संन्यासपूर्वकश्रवणादिपरिपाकसहिता ज्ञाननिष्ठोपसंहृता। ततो मां तत्वतो ज्ञात्वा विशते तदनंतरमित्यत्र। भगवद्भक्तिनिष्ठा तूभयसाधनभूतोभयफलभूता च भवतीयं तु उपसंहृता सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेत्यत्र। भाष्यकृता तु सर्वधर्मान्परित्यज्येति सर्वकर्मसंन्यासानुवादेन मामेकं शरणं व्रजेति ज्ञाननिष्ठोपसंहृतेत्याहुः। भगवदभिप्रायवर्णने केवयं वराकाः। वचोऽस्य गीताख्यं परमपुरुषस्यागमगिरां रहस्यं तद्व्याख्यामनतिनिपुणः कोवितनुतां॥ अहं हेलेनद्धात्यं यदि हत्कृतवानस्मि कथमप्येहतु स्नेहानां तदपि कुतकाय्येवमहतां॥ ॥६६॥ ८०

समाप्तः शास्त्रार्थः॥ शास्त्रसंप्रदायविधिं मधुसूदनः कथयति॥ ॥ इदं ते नातपस्काय नाभक्ताय क-
दाचन। न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥६७॥ ॥ इदं गीताख्यं स्वशास्त्रार्थरहस्यं ते तव सं-
सारविच्छित्तये मयोक्तं नातपस्काय असंयतेन्द्रियाय न वाच्यं कदाचन कस्यामप्यवस्थायामिति प-
र्यायत्रयेऽपि संबध्यते। तपस्विनेऽप्यभक्ताय गुरौ देवे च भक्तिरहिताय न वाच्यं कदाचन न तपस्विने भक्ता-
यापि अशुश्रूषवे शुश्रूषां पस्वियमकुर्वते च न वाच्यं कदाचन न च शब्दः वाच्यं कदाचनेति पदद्वयाक-
र्षणार्थः। न च मां योऽभ्यसूयति। मां भगवतं वासुदेवं मनुष्यमसर्वज्ञत्वादिगुणकं मत्वाऽभ्यसूयति
आत्मप्रशंसादिदोषाध्यारोपणेनेश्वरत्वमसहमानो द्वेष्टि च तस्मै श्रीकृष्णोत्कर्षसहिष्णवे तप-
स्विने भक्ताय शुश्रूषवेऽपि न वाच्यं कदाचनेत्यनुकर्षणार्थश्चकारः। तपस्विने भक्ताय शुश्रूषवे श्री-
कृष्णानुरक्ताय च वाच्यमित्यर्थः। एकैकविशेषणाभावेऽप्ययोग्यताप्रतिपादनार्थाश्चत्वारो नका-
राः। मेधाविने तपस्विने वेत्यत्र विकल्पदर्शनात्। शुश्रूषा गुरुभक्तिर्भगवदनुरक्तिरक्ताय तपस्वि-
ने तद्युक्ताय मेधाविने वा वाच्यं। मेधातपस्विनोः पाक्षिकत्वेऽपि भगवदनुरक्तिगुरुभक्तिशुश्रूषा-
णां नियम एवेति भाष्यकृतः॥६७॥ एवं संप्रदायस्य विधिमुक्त्वा तस्य कर्तुः फलमाह॥ ॥ य इ-
मं परमं गुह्यं मद्भक्तेष्वभिधास्यति। भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥६८॥ ॥ यः सं-

अ॰१८

प्रदायस्यप्रवर्त्तकः।इमंआवयोःसंवादरूपंग्रंथंपरमंनिरतिशयपुरुषार्थसाधनंगुह्यंरहस्यार्थत्वात्।सर्व
त्रप्रकाशयितुमनर्हंमद्भक्तेषुमांभगवंतंवासुदेवंप्रसन्नगुरुभक्तेषुअभिधास्यतिअर्पितोग्रंथतोऽर्थतश्चधास्य
तिस्थापयिष्यतिभक्तेषुनग्रहणात्पूर्वोक्तविशेषणत्रयपरिहीनस्यापिभगवद्भक्तिमात्रेणपात्रतासूचिता
भवति॥कथमभिधास्यतित्राहभक्तिंमयिपरांकृत्वा।भगवतःपरमगुरोःशुश्रूषैवेयंमयाक्रियतइ
त्येवंकृत्वानिश्चित्ययोभिधास्यतिसमामेवैष्यतिमांभगवंतंवासुदेवमेष्यत्येवअचिरान्मोक्ष्यतएवसंसा
रादत्रसंशयोनकर्त्तव्यः।अथवामामपिपरांभक्तिंकृत्वाऽसंशयोनिःसंशयःसन्मामेष्यत्येवेतिवाम
मेवैष्यतिनान्यमितियथाश्रुतमेववायोज्यं॥६८॥ किंच॥ ॥नचतस्मान्मनुष्येषुकश्चिन्मेप्रिय
कृत्तमः।भवितानचमेतस्मादन्यःप्रियतरोभुवि॥६९॥ ॥तस्मान्मद्भक्तेषुशास्त्रसंप्रदायकृत-
त्सकाशादन्योमनुष्येषुमध्येकश्चिदपिममप्रियकृत्तमः।अतिशयेनप्रियकृत्मद्विषयप्री
त्यतिशयवान्नास्तिवर्तमानकालेनापिप्रागासीत्तादृक्कश्चित्।नचकालांतरेभवितभविष्यतिम
मापितस्मादन्यःप्रियतरः।प्रीत्यतिशयविषयःकश्चिदप्यासीन्नाधुनाचभुविलोकेऽस्मिन्नास्ति
नचकालांतरेभवितेत्याव्याख्यायोज्यं॥६९॥अध्यापकस्यफलमुक्त्वाऽध्येतुःफलमाह॥अध्येष्य
तेचयइमंधर्म्यंसंवादमावयोः॥ज्ञानयज्ञेनतेनाहमिष्टःस्यामितिमे[illegible]ः॥७०॥ ॥अवयो-

चि

२

81

संवादमिमंग्रंथंधर्म्यंधर्मादनपेतंयोऽध्येष्यतेजपरूपेणपठिष्यति।ज्ञानयज्ञेनज्ञानात्मकेनयज्ञेनच
तुर्थाध्यायोक्तेनद्रव्ययज्ञादिभ्यःश्रेष्ठेनाहंसर्वेश्वरस्तेनाध्येत्राइष्टःपूजितःस्यामितिमेमतिर्ममनि
श्चयः।यद्यप्यसोगीतार्थमबुध्यमानएवजपतितथापितच्छृण्वतोमममामेवासोप्रकाशयतीति
बुद्धिर्भवतिअतोजपमात्रादपिज्ञानयज्ञफलंमोक्षंलभतेसत्वशुद्धिज्ञानोत्पत्तिद्वाराअर्थानुसंधा
नपूर्वकंपाठस्तुसाक्षादेवमोक्षइतिकिंवक्तव्यमितिफलविधिरेवायंनार्थवादः।श्रेयान्द्रव्यमया
मैंद्यज्ञाज्ज्ञानयज्ञःपरंतपेतिहिप्रागुक्तं॥७०॥प्रवक्तुरध्येतुश्चफलमुक्तंश्रोतुरिदानींफलंक
थयति॥ ॥श्रद्धावाननुसूयश्चशृणुयादपियोनरः।सोपिमुक्तःशुभाल्लोकान्प्राप्नुयात्पुण्य
कर्मणां॥७१॥ योनरःकश्चिदपिअन्यस्योच्चैर्जपतःकारुणिकस्यसकाशाच्छ्रद्धावान्।श्रद्धायुक्तः।
तथापिकिमर्थमयमुच्चैर्जपसबद्धंवाजपतीतिदोषदृष्ट्याऽसूययारहितोऽनुसूयश्चयःकेवलं
शृणुयादिमंग्रंथं।अपिशब्दात्किमुतार्थज्ञानवान्।सोपिकेवलाक्षरमात्रश्रोतापिमुक्तःपा
पेःशुभान्प्रशस्ताल्लोकान्पुण्यकर्मणामश्वमेधादिकृतांप्राप्नुयान्।ज्ञानवतस्तुकिंवाच्यमिति
स्वै भावः॥७१॥शिष्यस्यज्ञानोत्पत्तिपर्यंतंगुरुणाकारुणिकेनप्रयासःकार्यइतिगुरोर्धर्मंशीक्ष
यितुंसर्वज्ञोपिपुनरुपदेशापेक्षानास्तीतिज्ञापनायपृच्छति॥ ॥कच्चिदेतच्छ्रुतंपार्थत्वयैकाग्र

७२०९८ णचेतसा।कच्चिदज्ञानसंमोहःप्रनष्टस्तेधनंजय॥७२॥कच्चिदितिप्रश्ने।एतन्मयोक्तंगीताशास्त्रंएका
ग्रेणव्यासंगरहितेनचेतसाहेपार्थत्वयाकिंश्रुतंअर्थतोवधारितंकच्चित्किंअज्ञानसंमोहःअज्ञान
निमित्तःसंमोहोविपर्ययःअज्ञाननाशात्प्रनष्टःप्रकर्षेणपुनरुत्पत्तिविरोधित्वेननष्टस्तेतवहेधनंज
य।यदिस्यात्पुनरुपदेशंकरिष्यामीत्यभिप्रायः॥७२॥एवंपृष्टःकृतार्थत्वेनपुनरुपदेशानपेक्षतामा
त्मनः॥अर्जुनउवाच॥ ॥नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत।स्थितोस्मिगतसंदेहःकरि
ष्येवचनंतव॥७३॥नष्टउच्छिन्नोमोहःअज्ञानकृतोविपर्ययः।तन्नाशकमाह॥स्मृतिर्लब्धात्वत्प्रसा
दान्मयायस्मात्त्वदुपदेशादात्मज्ञानेलब्धंसर्वसंशयनाशकंततयाप्राप्तं।अतःसर्वप्रतिबंधशून्येनोस
ज्ञानेनमोहोनष्टइत्यर्थः।हेअच्युतआत्मत्वेननिश्चितत्वाद्वियोगायोग्यस्मृतिलंभेसर्वग्रंथिनांविप्र
मोक्षइतिश्रुत्यर्थमनुसंदधन्नाह।स्थितोस्मिगतसंदेहोनिरस्तसर्वसंदेहःस्थितोस्मियुद्धकर्तव्यतारू
पेणतत्प्रासनेनयावज्जीवंचकरिष्येवचनंतवभगवतःपरमगुरोराज्ञापालयिष्यामीतिप्रयाससाफल्य
कथनेनभगवंतमर्जुनःपरितोषयामास।अनेनगीताशास्त्राध्यायिनोभगवत्प्रसादादवश्यंमोक्ष
फलपर्यंतंज्ञानंभवतीतिशास्त्रफलमुपसंहृतं।तद्धास्यविजज्ञावितिवत्॥७३॥ समाप्तःशास्त्रार्थः
कथ्यावसंबंधमिदानीमनुसंधानः॥ ॥संजयउवाच॥ ॥इत्यहंवासुदेवस्यपार्थस्यचम ८२

83

महात्मनः। संवादमिममश्रौषमद्भुतं रोमहर्षणं॥ ॥७४॥ अद्भुतं चेतसो विस्मयाख्यविकारकरं लोकेष्व
संभाव्यमानत्वात्॥ रोमहर्षणं। शरीरस्य रोमांचाख्यविकारकरं तेनातिपरिपुष्टं विस्मयस्य दर्शितं।
स्पष्टमन्यत्॥७४॥ ॥व्यवहितस्यापि भगवदर्जुनसंवादस्य श्रवणयोग्यतामात्मन आह॥ ॥
व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परं। योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयं॥७५॥ व्यासदत्त
दिव्यचक्षुःश्रोत्रादिलाभरूपाद्व्यासप्रसादादिमं परं गुह्यं योगं योगाव्यभिचारहेतुं संवादं योगेश्व
रात्कृष्णात्स्वयं स्वेन परमेश्वररूपेण कथयतः साक्षादेवाहं श्रुतवानस्मि न परंपरयेति स्वभा
ग्यमभिनंदति। अत्रेममिति पुल्लिंगपाठो भाष्यकारैर्व्याख्यातः। एतदिति नपुंसकलिंगपाठस्ये
वयोगशब्दसामानाधिकरण्येन व्याख्यानमिदमिति तद्व्याख्यानारः॥७५॥ ॥राजन्संस्मृत्य
संस्मृत्य संवादमिममद्भुतं॥ केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः॥७६॥ ॥पुण्यं श्रवणेनापि
सर्वपापहरं केशवार्जुनयोरनयोरिमं संवादमद्भुतं। न केवलं श्रुतवानस्मि किंतु संस्मृत्य संस्मृत्य
संभ्रमे द्विरुक्तिः मुहुर्मुहुर्वारंवारं हृष्यामि हर्षं प्राप्नोमि च प्रतिक्षणं रोमांचितो भवामीति वा॥७६॥
यद्विश्वरूपाख्यं सगुणं रूपमर्जुनाय ध्यानार्थं भगवान्दर्शयामास तदिदानीमनुसंधानआह॥ ॥
तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः॥ विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः॥७७॥ ॥तददति

न्र

84

१०१८ विश्वरूपं हे राजन्मम महान् विस्मयो। अत एव हृष्यामि चाहं स्पष्टमन्यत्॥७७॥ एवं च सति स्वपुत्रे विजयादि
संसंभावनां परित्यजेत्याह॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः। तत्र श्रीर्विजयो भूतिर्ध्रुवा नीति
र्मतिर्मम॥७८॥ यत्र यस्मिन्युधिपक्षे योगेश्वरः सर्वयोगसिद्धीनामीश्वरः सर्वज्ञः सर्वशक्तिर्भगवा
न्कृष्णो भक्तदुःखकर्षणास्तिष्ठति नारायण यत्र पार्थो धनुर्धरः यत्र गाण्डीवधन्वा तिष्ठत्यर्जुनो नरः
तत्र नारायणाधिष्ठिते तस्मिन्युधिष्ठिरपक्षे श्रीः राज्यलक्ष्मीः विजयः शत्रुपराजयनिमित्त उत्कर्षः
भूतिः उत्तरोत्तरं राज्यलक्ष्म्याः विवृद्धिः ध्रुवाऽवश्यंभाविनीति सर्वत्रान्वयः। नीतिर्नयः एवं मम मति
र्निश्चयः तस्माद्वृथा पुत्रविजयाशां त्यक्त्वा भगवदनुगृहीतैर्लक्ष्मीविजयादिभागिभिः पांडवैः सहसं
धिरव विधियतामित्यभिप्रायः॥७८॥ वंशीविभूषितकरान्नवनीरदाभात्पीतांबरादरुणबिंबफला
धरोष्ठात्। पूर्णेन्दुसुंदरमुखादरविंदनेत्रात्कृष्णात्परं किमपि तत्त्वमहं न जाने॥१॥ कौ उत्तरयात्मके शा=
स्त्रं गीताख्यं येन निर्मितं। आदिमध्यान्तषट्केषु तस्मै भगवते नमः॥२॥ श्रीगोविंदमुखारविंदमधुना
मिष्टं महाभारते गीताख्यं परमं रहस्यमृषिणा व्यासेन विख्यापितं। व्याख्यातं भगवत्पदैः प्रति
पदे श्रीशंकराख्यैः पुनर्विस्पष्टं मधुसूदनेन मुनिना स्वज्ञानशुद्ध्यै कृतं॥३॥ इह योऽस्ति विमोह
यन्मनः परमानंदघनः सनातनः गुणदोषभिदेष एव न स्तृणतुल्यो यदयं स्वयं जनः॥४॥

श्रीरामविश्वेश्वरमाधवानांप्रसादमासाद्यमयागुरूणां॥ व्याख्यानमेतद्विहितंसुबोधंसमर्पितं
तच्चरणांबुजेषु॥५॥ ॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपूज्य
पादशिष्यश्रीमधुसूदनसरस्वतीविरचितायांश्रीमद्भगवद्गीतागूढार्थदीपिकायामष्टादशो
ध्यायः समाप्तः॥ ॥१८॥ समाप्तंचेदंगीताशास्त्रं। श्रीनृसिंहार्पणमस्तु॥ ग्रंथसंख्या॥१४००॥
समग्राष्टादशाध्यायसंख्या॥ ९९८॥ अनेकयद्दैशिकराजपुंजैः प्रलोभितंमापतितंभवाब्धौ।
चिन्मात्रबोधेनविमोच्ययस्तंकाशीराजंगुरुराजमीडे॥ श्रीकृष्णार्पणमस्तु॥ छ॥ छ॥
शाके१६५८ नळनामसंवत्सरेभाद्रपदशुद्ध७ तद्दिनेगोविंदेनलिखितंग्रंथसमाप्तः॥ छ॥ छ॥

44

KKSU LIBRARY
RAMTEK
441 106
M-1760
Dist. Nagpur

```
[OrderDescription]
,CREATED=28.09.20 10:38
,TRANSFERRED=2020/09/28 at 10:51:11
,PAGES=86
,TYPE=STD
,NAME=S0003738
,Book Name=M-1760-BHAGWAT GEETA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
```

```
FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,
```